अथ विवाह-पद्धतिः भाषा-टीका सहितम्

प्रकाशक—तेजकुमार-बुकडिपो, (प्रा०) लिमिटेड पोस्ट-बाक्स ८५, लखनऊ
मूल्य

T.K.B.D.
Lko.
Rs. 30

ॐ शिवाय नमः ।

अथ विवाहपद्धतिः

भाषाटीकासहिता ।

—:o:—

मङ्गलाचरणम् ।

विष्णुं शम्भुं गणेशं च ब्रह्माणं भारतीं तथा । अम्बिकां बुद्धिदात्रीं च वन्दे विघ्नोपशान्तये ॥
नत्वा सर्वान् मुनीन्दिव्यान्वेदमार्गप्रवर्तकान् । ग्रन्थेभ्यः सारमुद्धृत्य विचार्य सदसच्च यत् ॥
मुनीनां मतमालोक्य सम्प्रदायं सतां तथा । वरौडास्थलनिवासिना शिवगोविन्दधीमता ॥
बालानां सुखबोधाय निबन्धः क्रियते मया ॥

अथ विवाह-नियम विधि ।

१ वररक्षा, २ फलदान, ३ शुभकर्म, ४ शुभदिने गीतारम्भः, ५ क्षयी-यंत्रीपूजम्, ६ रात्रि-

जागरणम्, ७ स्तम्भारोपणम्, ८ तैलाभ्यंगम्, ९ मातृ-पूजापूर्वकमाभ्युदयिकश्राद्धम्, १० वर-यात्रा, ११ कूप-विवाह, १२ द्वारपूजा, १३ पादधोवा, (चरणप्रक्षालनम्), १४ दुर्गायज्ञोपवीतम्, १५ सौभाग्यकर्म, १६ विवाहकृत्यम्, १७ द्विरागमन, (पाटा बदलना), १८ भात, १९ द्वितीय दिने निमंत्रणम्, २० तृतीय दिनेऽपि निमंत्रणम्, २१ चतुर्थदिने चतुर्थीकर्म्म, तद्दिने पंचमदिने वा वर-वधू यात्रा ॥

इसी क्रम से विवाह के नियम अलग-अलग करके कहेंगे। यथा—

अथ वर-रक्षा।

कन्या का पिता व भाई व नाई रोचनाक्षत से वर का तिलक कर फल, पुष्प, द्रव्य (अपने कुल के अनुसार) लेकर वर के हाथ में देवे। तिलक का मंत्र पढ़े यथा—

"ॐ त्वां गन्धर्व्वाऽअखनंस्त्वामिन्द्रस्त्वां बृहस्पतिः। त्वामोषधेसोमो राजा-विद्वान्न्यक्ष्मादमुच्यत ॥"

तदनन्तर आचार्य, पिता और माता आदिकों को भेंट देवे। इति वर-रक्षा।

अथ फलदान विधि ।

सामग्री— कलश, दिया, परई, पल्लव, धान्य, अक्षत, रोली, मौली, पान, सुपारी, द्रव्य, पंचरत्नी, औषधी, पंचपल्लव, गंध, दूर्वा, मृत्तिका, धूप, कपूर, बताशा, पिसान, आरती ॥

तत्र प्रथमविवाहांगभूतं वरवृत्तिपद्धतिफलदानमिति । तत्रानुक्रमणसूत्रम् । गोमयेन तु संलिप्य स्वदेशे मध्यचाङ्गणे । चतुष्कोणसमायुक्ते प्रशस्तैर्वा शुभैरपि ॥ आदौ मंडलकं कुर्यात्तत्र संस्थाप्य चासनम् । काष्ठपीठासनं दद्याद् विधिवत्पूर्वतोमुखम् ॥ आवाहयेद्गणाध्यक्षं कलशेवेदविद्द्विजः । इत्यादि । आम्रपल्लव, धान्य, सिंदूर, हरिद्रा, अक्षत, कुंकुम, गोमयी गौरी, दधि, घृत, शर्करा, दूर्वा, पूगीफलाद्यन्यतमानि वस्तूनि सम्पाद्य, स्वस्तिवाचनं कुर्यात् ॥

घर के आँगन को गोबर से लिपाय, चौक पुराय कर, कलशस्थापन करके, कुमार को वस्त्र-भूषण पहिना कर, अंजुली भराय, देवता व पितरों को नमस्कार कराय चौक पर लावे ॥

हस्ते अक्षतपुष्पाणि गृहीत्वा आनोभद्रादीन् मंगलमंत्रान् पठेत् ।

ॐ आनोभद्राः क्रतवो यन्तु विश्वतो दब्धासो अपरीतास उद्भिदः । देवानो
यथासदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवे दिवे ॥ १ ॥ देवानां भद्रासुमति-
र्ऋजूयतां देवानाꣳरातिरभिनो निर्वर्त्तताम् ॥ देवानाꣳ सख्यमुपसेदिमावयन्दे-
वानऽआयुः प्रतिरन्तुजीवसे ॥ २ ॥ तान्पूर्वंयानि विदाहूमहेवयं भगम्मित्रम-
दितिन्दक्षमस्त्रिधम् । अर्य्यमणं वरुणꣳ सोममश्विना सरस्वती नः सुभगा
मयस्करत् ॥ ३ ॥ तन्नो व्वातोमयोभुव्वा तु भेषजं तन्माता पृथिवी तत्पिताद्यौः ।
तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विनाशृणु तन्धिष्ण्यायुवम् ॥ ४ ॥ तमीशानं
जगतस्तस्थुषस्पतिन्धियं जिन्वमवसे हूमहेव्वयम् । पूषानो यथावेदसामसद्वृधेर-
क्षितापायुरदब्धः स्वस्तये ॥ ५ ॥ स्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा
विश्ववेदाः । स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥ ६ ॥ पृष-
दश्वा मरुतः पृश्निमातरः शुभं य्यावानो व्विदथेषु जग्मयः । अग्निर्जिह्वामनवः

सूरचक्षसो विश्वे नो देवाऽअवसागमन्निह ॥ ७ ॥ भद्रं कर्णेभिः शृणुयाम देवा भद्रं
पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाꣳ सस्तनूभिर्व्यशेमहि देवहितं यदायुः॥ ८ ॥
शतमिन्नुशरदोऽअन्ति देवा यत्रानश्चक्राजरसं तनूनाम् । पुत्रासो यत्र पितरो
भवन्ति मानो मद्ध्यारीरिषयायुर्गन्तोः ॥ ९ ॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्मा-
तासपितासपुत्रः । विश्वेदेवाऽअदितिः पञ्चजनाअदितिर्जातमदितिर्जनित्वम् ॥ १० ॥
द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवीशान्तिरापः शान्तिरोषधयः शान्तिः ।
वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वꣳ शान्तिः शान्तिरेव
शान्तिः सामा शान्तिरेधि ॥ ११ ॥ पयःपृथिव्याम्पयऽओषधीषु पयो दिव्यन्तरिक्षे
पयोधाः । पयस्वतीः प्रदिशः सन्तु मह्यम् ॥ १२ ॥ विष्णोरराटमसि विष्णोः
श्नप्त्रे स्थो विष्णोः स्यूरसि । विष्णोर्ध्रुवोसि । वैष्णवमसि विष्णवे त्वा ॥ १३ ॥
अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता व्वसवो देवता रुद्रा

देवतादित्या देवता मरुतो देवता विश्वेदेवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता ॥ १४ ॥ यतो यतः समीहसे ततो नो अभयं कुरु । शन्नः कुरु प्रजाभ्यो भयं नः पशुभ्यः ॥ १५ ॥ सुशान्तिर्भवतु ॥ इति स्वस्त्ययनम् ॥

आचार्य—वर को पूर्वाभिमुख बैठाकर आचमन करावे, पैंती धारण कराय पृथ्वी का संकल्पपूर्वक पूजन करावे । अर्थात् जल, रोचनाक्षत, पुष्प, धूप, दीप, नैवेद्याचमन, तांबूल, पूगीफल द्रव्य ले भूमि पर वर के सामने रक्खे, वर के दाहिने हाथ से स्पर्श करावे तिसका मंत्र पढ़े । यथा—

ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्रीं । पृथिवीं यच्छ पृथिवीन्दृꣳह पृथिवीं माहिꣳसीः ॥ इति भूमिस्पर्शः ॥

फिर दोनों हाथ जोड़े, यह मंत्र पढ़े । यथा—

ॐ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः । मानोव्वीरान्नुद्रभामिनोवधीर्हविष्मन्तः सदमित्वाहवामहे ॥ इति गौरीस्पर्शः ॥

अक्षत हाथ में लेकर कलशस्थापन करे, तिसका मंत्र पढ़े यथा–

आजिघ्रकलशं मह्यात्वाव्विशन्त्विन्दवः पुनरूर्ज्जानिवर्त्तस्वसानः सहस्रन्धुक्ष्वोरुधारापयस्वतीः पुनर्म्माविशताद्रयिः ॥ इति कलशस्पर्शः ॥

इन मंत्रों से कलश में जल व द्रव्यादिकों को डाले तिसका मंत्र पढ़े । यथा–

ॐ वरुणस्योत्तम्भनमसिव्वरुणस्यस्कम्भसर्ज्जनीस्त्थोव्वरुणस्यऽऋतसदन्यसिव्वरुणस्यऽऋतसदनमसिव्वरुणस्य ऋतसदनमासीद ॥ इति जलम् ॥ पवित्रेस्थो व्वैष्णव्योसवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः ॥ इति पवित्रकं कलशे क्षिपेत् ॥ अम्बे अम्बिके अम्बालिके न मानयति कश्चन । ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ॥ इति कलशे आम्रपल्लवप्रक्षेपः ॥ परिवाजपतिः कविरग्निर्हव्यान्यक्रमत् । दधद्रत्नानिदाशुष ॥ इति पंचरत्नीः ॥ त्वां गन्धर्व्वाऽअखनंस्त्वामिन्द्रस्त्वां बृहस्पतिः । त्वमोषधे सोमोराजाव्विद्वान्य-

क्ष्मादमुच्यत ॥ इति गन्धम् ॥ याऽओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः
तासामसित्वमुत्तमारं कामायशꣳहृदे ॥ इति औषधी ॥ स्योनापृथिविनोभवानृक्षरा-
निवेशनी यच्छानः शर्म्मसप्रथाः ॥ इति मृत्तिका ॥ काण्डात्काण्डात्प्ररोहन्ती
परुषः परुषस्स्परि । एवानोदूर्व्वेप्रतनुसहस्रेण शतेन च ॥ इति दूर्वा ॥ अश्श्वत्थ
वोनिषदम्पर्णेवोव्वसतिष्कृतागोभाज ऽइत्किलासथ यत्सनवथपूरुषम् ॥ इति
पंचपल्लव ॥ याः फलिनीर्या अफला अपुष्पायाश्च पुष्पिणीः बृहस्पतिप्रसू-
तास्तानोमुञ्चंत्वꣳहसः ॥ इति पूगीफलम् ॥ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य
जातः पतिरेक आसीत् । सदाधारपृथिवीं द्यामुतेमाङ्कस्मै देवाय हविषाव्विधेम ॥
इति द्रव्यम् ॥ ॐ पान्तमावोअन्धसइन्द्रामभि प्रगायत । विश्वासोहꣳ शतक्रतुम्म
ꣳहिष्टं चर्षणीनाम् ॥ इति ताम्बूलम् ॥

ॐ धान्यमसि धिनुहि देवान् प्राणायत्वोदानायत्वाव्यानायत्वादीर्घामनु-

प्रसृतिमायुषेधान्देवो वः सविता हिरण्यपाणिः प्रतिगृह्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोसि ॥ इति धान्यम् ॥

कलश पर धान्यादिक स्थापित कर तिसके ऊपर दीपक धरे, तिसका मंत्र पढ़े । यथा--

ॐअग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्य्योज्योतिर्ज्योतिः सूर्य्यः स्वाहा। अग्निर्वर्चो ज्योतिर्वर्च्चस्स्वाहा सूर्य्योवर्च्चोज्योतिर्व्वर्च्चस्स्वाहा ॥ ज्योतिस्सूर्यं-स्सूर्यो ज्योतिः स्वाहा ॥ इति कलशोपरिदीपं दद्यात् ॥

ॐ पूर्णादर्विपरापतसुपूर्णापुनरापत । वस्नेवव्विक्रीणावहाइषमूर्ज्जं शत-क्रतो ॥ ॐमनोजूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्य्यज्ञमिमन्तनो त्वरिष्टम्। यज्ञं समिमन्दधातु ॥ विश्वेदेवा स इहमादयान्तामों ३ प्रतिष्ठ ॥ ॐ एष वै प्रतिष्ठा-नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते। तेन सर्व्वमेव प्रतिष्ठितं भवति ॥ इति कलशस्थापनम् ॥

इस प्रकार कलश स्थापन करके हाथ में अक्षत लेकर कलश की प्रतिष्ठा करे । यथा--

अत्र गणेशवरुणगौर्यादिकलशाधिष्ठितदेवतास्सर्वे इहागच्छन्तु इह तिष्ठन्तु सुप्रीता वरदा भवन्तु ॥ इति कलशप्रतिष्ठा ॥

हाथ में पुष्पाक्षत लेकर दशों दिशा में फेंके । यथा--

अथ भूतोत्सारणम्--अपसर्प्पन्तु ये भूता ये भूता भुवि संस्थिताः । ये भूता विघ्नकर्त्तारस्ते नश्यन्तु शिवाज्ञया ॥

कुशपुष्पयवाक्षतजलद्रव्यं चादाय संकल्पं कुर्यात् । यथा--

ॐतत्सदद्येहेत्यादि अमुकगोत्रोऽमुकशर्माहं एष प्रमदाप्राप्तिकफलदानादि चतुर्थीकर्म्मान्तयज्ञनिर्विघ्न समाप्त्यर्थं गणेशादिदेवानां पूजनमहं करिष्ये ।

हाथ में अक्षत लेकर गणेशजी का आवाहन करे । यथा-

हस्ते अक्षतान् गृहीत्वा गणपतिमावाहयेत् । तत्र मंत्रः-

हेहेरम्ब त्वमेह्येहि ह्यम्बिकात्र्यम्बकात्मज। सिद्धिबुद्धिपते त्र्यक्ष लक्षलाभपितुः पितः॥ नागास्य नागहारस्त्वं गणराज चतुर्भुज। भूषितः स्वायुधैर्दन्तपाशांकुशपरश्वधैः॥ आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः। इहागत्य गृहाण त्वं पूजायागं च रक्ष मे॥

इस मंत्र से गणेशजी को स्नान कराना चाहिये। यथा—

ॐ भूर्भुव स्वः गणपतये नमः। ॐ गणानां त्वा गणपतिꣳहवामहे प्रियाणान्त्वा प्रियपतिꣳहवामहे निधीनां त्वानिधिपतिꣳहवामहे वसो मम। आहम जानि गर्ब्भधमात्वमजासि गर्ब्भधम्॥ इति गणपतये नमः। पाद्यम्, अर्घ्यम्, आचमनीयम्, स्नानम्, गन्धम्, अक्षतम्, पुष्पम्, धूपम्, दीपम्, नैवेद्यम्, ताम्बूलम्, पूगीफलम्, दक्षिणां च यथाशक्त्या पूजयेत्।

इस प्रकार गणपति का पूजन कर फिर वरुण का पूजन करे—

ततो वरुणपूजा—कलशे वरुणाद्यावाहितदेवताः सुप्रतिष्ठिता वरदा भवन्तु।

भूर्भुवः स्वः वरुणाय नमः। ॐ इमम्मे वरुणश्रुधी हवमद्या च मृडय ॥ त्वामवस्युराचके। वरुणाय नम इमानि पाद्यादीनि।

ततो गौरीपूजनम्। यथा—

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्या वहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ॥ इष्णन्निषाणा मुम्मइषाण सर्वलोकं मइषाण ॥ एतानि पाद्यादीनि श्रीगौर्य्यै नम इति यथालब्धोपचारैः प्रपूज्य साञ्जलिः प्रार्थयेत् ॥

फिर जलाक्षत द्रव्य लेकर संकल्प करे।

ॐ अद्येहेत्यादि देशकालौ स्मृत्वा वाग्दानकर्मणः निर्विघ्नपरिसमाप्त्यर्थं कृतयानया जलचन्दनाक्षतधूपदीपनैवेद्यादिकतया गणेशवरुणगौर्य्यः सुप्रीता भवन्तु।

इस प्रकार समर्पण करे। फिर दोनों हाथ जोड़कर प्रार्थना करे। यथा—

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः । लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥ १ ॥ धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः । द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥ २ ॥ विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा । संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥ ३ ॥ शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजम् । प्रसन्न-वदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ ४ ॥ अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः । सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥ ५ ॥ सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके । शरण्ये त्र्यंबके गौरि नारायणि नमोऽस्तुते ॥ ६ ॥ सर्वदा सर्वकार्येषु नास्ति तेषाममंगलम् । येषां हृदिस्थो भगवान्मंगलायतनो हरिः ॥ ७ ॥ तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव । विद्याबलं दैवबलं तदेव लक्ष्मीपते तेंऽघ्रियुगं स्मरामि ॥ ८ ॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः । येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥ ९ ॥ यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।

तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ १० ॥ अनन्याश्चिन्तयन्तो मां ये
जनाः पर्युपासते। तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ ११ ॥ स्मृते सकल-
कल्याणं भाजनं यत्र जायते। पुरुषं तमजं नित्यं व्रजामि शरणं हरिम् ॥ १२ ॥
विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय । नागाननाय
श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते ॥ १३ ॥ भक्तार्त्तिनाशनपराय
गणेश्वराय सर्वेश्वराय शुभदाय सुरेश्वराय ॥ विद्याधराय विकटाय च वामनाय भक्त-
प्रसन्नवरदाय नमो नमस्ते ॥ १४ ॥ नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः । नमस्ते
रुद्ररूपाय करिरूपाय ते नमः ॥ १५ ॥ विश्वरूपस्वरूपाय नमस्ते ब्रह्मचारिणे ।
भक्तप्रियाय देवाय नमस्तुभ्यं विनायक ॥ १६ ॥ लम्बोदर नमस्तुभ्यं सततं
मोदकप्रिय । निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ १७ ॥ त्वां विघ्नशत्रु-
दलनेति च सुन्दरेति भक्तप्रियेति सुखदेति फलप्रदेति ॥ विद्याप्रदेत्यघहरेति च

ये स्तुवन्ति तेभ्यो गणेश वरदो भव नित्यमेव ॥ १८ ॥ वक्रतुण्ड महाकाय कोटि-
सूर्यसमप्रभ । निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ १९ ॥

अनेन पूजनेन भो श्रीगणेशवरुणगौर्य्यः आयुःकर्त्तारः, क्षेमकर्त्तारः, शुभ-
कर्त्तारो भवन्तु । इति प्रार्थयेत् ॥

कलश के उत्तर तरफ नवग्रहों को स्थापन करके वेदोक्त मंत्रों से पूजन करना चाहिये । यथा—

अथ सूर्यादिग्रहाणां स्थापनक्रमः । ईशाने मण्डलं कृत्वा ग्रहाणां स्थापनं
ततः । वृत्तमंडलमादित्यमर्धचन्द्रं निशाकरम् ॥ त्रिकोणं मंगलं चैव बुधं च धनुषाकृ-
तिम् । गुरुमष्टदलं प्रोक्तं चतुःकोणं च भार्गवम् ॥ नराकृतिं शनिं विंद्याद्राहुं च
मकराकृतिम् । केतुं खड्गसमं ज्ञेयं ग्रह मंडलके शुभे ॥ अथवा ॥ वृत्तमंडलमादित्यं
चतुरस्रं निशाकरम् । त्रिकोणं मंगलं चैव बुधे वै बाणसन्निभम् ॥ गुरवे पट्टिशाकारं
पञ्चकोणं भृगुस्तथा । मन्दे च धनुषाकारं शूर्पाकारं तु राहवे ॥ केतवे च ध्वजाकारं

मंडलानि क्रमेण तु । शुक्रार्कौ प्रांमुखौ ज्ञेयौ गुरुसौम्यौ उदंमुखौ ॥ प्रत्यंमुखौ शनीसोमौ शेषा दक्षिणतो मुखाः । मध्ये तु भास्करं विंद्याच्छशिनं पूर्वदक्षिणे ॥ दक्षिणे लोहितं विंद्याद्बुधं पूर्वोत्तरेण तु । उत्तरेण गुरुं विंद्यात्पूर्वेणैव तु भार्गवम् ॥ पश्चिमे तु शनिं विंद्याद्राहुं दक्षिणपश्चिमे । पश्चिमोत्तरतं केतुमित्येषा ग्रहसंस्थितिः ॥ आदित्याभिमुखास्सर्वे साधिप्रत्याधिदेवताः । आधिदेवता दक्षिणे वामे प्रत्यधिदेवताः ॥ अरुणौ सूर्यभौमौ च श्वेतशुक्रौ निशाकरौ । हरितवर्णो बुधश्चैव पीतवर्णो गुरुस्तथा ॥ कृष्णवर्णाः शनीराहुकेतवस्तु तथैव च । ततः पूर्वनिर्मितग्रहवेद्यां श्वेतवस्त्रं प्रसार्य नवग्रहमंडलं विलिख्य मध्यादिकोष्ठेषु उक्तदिक्षु विदिक्षु सूर्यादिग्रहाणां स्थापनं पूजनं च कुर्यात् ॥

इस प्रकार सूर्यादि नवग्रहों को कलश के उत्तर (ईशान कोण में) स्थापित करे और वेदोक्त मंत्रों से पूजन करे । यथा–

अथ सूर्याद्यावाहनम् । ॐ भूर्भुवः स्वः कलिंगदेशोद्भव काश्यपसगोत्र रक्तवर्ण

भो सूर्य इहागच्छ इह तिष्ठ सूर्याय नमः सूर्यमावाहयामि स्थापयामि ॥ १ ॥

ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतम्मर्त्त्यञ्च । हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥ इति सूर्य्यं प्रपूज्य ॥

ॐ भूर्भुवः स्वः यमुनातीरोद्भव आत्रेयसगोत्र शुक्लवर्ण भो सोम इहागच्छेह तिष्ठ सोमाय नमः सोममावाहयामि स्थापयामि ॥ २ ॥

ॐ इमन्देवाऽऽअसपत्नꣳ सुबध्द्वम्महते क्षत्राय महते ज्ज्यैष्ठ्याय महते जान-राज्यायेन्द्रस्येन्द्रियाय । इमममुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएष वोमी राजा सोमोऽस्माकम्ब्राह्मणानाꣳ राजा ॥ इति सोमं प्रपूज्य ॥

ॐ भू० अवंतिकापुरोद्भव भारद्वाजसगोत्र रक्तवर्णभौम ।इ० भौमाय० भौमं० ॥३॥

ॐ अग्निर्म्मूर्द्धा दिवः ककुत्पतिः पृथिव्याऽअयम् ॥ अपाꣳ रेताꣳसि जिन्वति ॥ इति भौमं प्रपूज्य ॥

ॐ भू० मगधदेशोद्भव आत्रेयसगोत्र हरितवर्ण भो बुध इ० बुधाय० बुधमा ० ॥ ४ ॥

ॐ उद्बुद्ध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सᳬसृजेथामयञ्च । अस्मिन्त्सधस्थेऽअद्ध्युत्तरस्मिन् विश्वेदेवा यजमानश्च सीदत ॥ इति बुधं प्रपूज्य ॥

ॐ भू० सिंधुदेशोद्भव आंगिरसगोत्र पीतवर्ण भो बृहस्पते इ० बृहस्पतये० बृहस्पतिं० ॥ ५ ॥

ॐ बृहस्पतेऽअतियदर्य्योऽअर्हाद्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवसऽऋतप्रजा ततदस्मासुद्रविणन्धेहि चित्रम् ॥ उपयामगृहीतोसि बृहस्पतयेत्त्वैष ते योनिर्ब्बृहस्पतये त्त्वा । इति बृहस्पतिं प्रपूज्य ॥

ॐ भू० भोजकटदेशोद्भव भार्गवसगोत्र शुक्लवर्ण भो शुक्र इ० शुक्राय० शुक्रं० ॥ ६ ॥

ॐ अन्नात्परिस्रुतोरसम्ब्रह्मणा व्यपिबत्क्षत्रम्पयः सोमम्प्रजापतिः। ऋतेन सत्यमिन्द्रियंविपानꣳशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयो मृतम्मधु ॥ इति भृगुं प्रपूज्य ॥

ॐ भू० सौराष्ट्रदेशोद्भव काश्यपसगोत्र कृष्णवर्ण भो शनैश्चर इ० शनैश्चराय० शनैश्चरं० ॥ ७ ॥

ॐ शन्नोदेवीरभिष्टयऽआपो भवन्तु पीतये। शंय्योरभिस्रवन्तुनः इति शनैश्चरं प्रपूज्य ॥

ॐ भू० राठिनापुरोद्भव पैठिनसगोत्र कृष्णवर्ण भो राहो इ० राहवे नमः राहुं० ॥ ८ ॥

ॐ कयानश्चित्रऽआभुवदूती सदावृधः सखा। कयाशचिष्ठयावृता ॥ इति राहुं प्रपूज्य ॥

ॐ भू अंतर्वेदिसमुद्भव जैमिनसगोत्र कृष्णवर्ण भो केतो इ० केतुं० ॥ ९ ॥

ॐ केतुं कृण्वन्नकेतवे पेशो मर्य्याऽअपेशसे । समुषद्भिरजायथाः ॥ इति केतुं प्रपूज्य ॥

ततो ब्रह्माणं पूर्वस्यान्दिशि पूजयेत्–ॐ ब्रह्मयज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोव्वेनऽआवः सबुध्न्याऽउपमाऽअस्यव्विष्ठाः । सतश्च योनिमसतश्चव्विवः ॥ ब्रह्मणे नमः ॥ १ ॥ ॐ विष्णोररराटमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि । वैष्णवमसि विष्णवे त्वा ॥ स्पृशामि ॥ विष्णवे नमः ॥ २ ॥ ॐ नमश्शम्भवाय च मयो भवाय च नमश्शङ्कराय च मयस्कराय च नमश्शिवाय च शिवतराय च ॥ शिवाय नमः ॥ ३ ॥ ॐ जयन्ती मङ्गला काली भद्रकाली कपालिनी । दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तुते ॥ ४ ॥ ॐ दुर्गायै नमः । इन्द्रादिदशदिक्पालेभ्यो नमः । अर्कादिसप्तवासरेभ्यो नमः । प्रतिपदादिपञ्चदशतिथिभ्यो नमः । अश्विन्यादिसप्तविंशति नक्षत्रेभ्यो नमः । मेषादि-

द्वादशराशिभ्यो नमः। विष्कुम्भादिसप्तविंशतियोगेभ्यो नमः। बवादिएकादश करणेभ्यो नमः। ॐ गङ्गायै नमः। ॐ यमुनायै नमः। ॐ सरस्वत्यै नमः। ॐ सप्तसमुद्रेभ्यो नमः। ॐ सप्तपितृभ्यो नमः। विश्वेभ्यो देवेभ्यो नमः। ॐ ग्रामदेवेभ्यो नमः। ॐ इष्टदेवताभ्यो नमः। ॐ कुलदेवताभ्यो नमः। ॐ वास्तुदेवताभ्यो नमः। ॐ स्थानदेवताभ्यो नमः। ॐ सर्वेभ्योदेवेभ्यो नमः। सर्वेभ्यो ब्राह्मणेभ्यो नमः॥ इदं पाद्यम्, इदमर्घम्, इदमाचमनीयम्, स्नानम्, गन्धम्, अक्षतम्, बिल्वपत्रम्, पुष्पम्, धूपम्, दीपम्, नैवेद्यम्, पुनराचमनीयम्, ताम्बूलम्, पूगीफलम्, दक्षिणाम्, ततः सपुष्पाञ्जलिः प्रार्थयत्।

अनेन पूजनेन भो देवास्सुप्रीता वरदा भवन्तु।

इसी प्रकार नवग्रहादिकों का पूजन करना चाहिये।

तत आचार्यादीन् ब्राह्मणान्यथाशक्त्या वृणुयात्। यथा मन्त्रः—ॐ आपद्

घनध्वान्तसहस्रभानवस्समीहितार्थार्पणकामधेनवः । अपारसंसारसमुद्रसेतवः पुनन्तु माम्ब्राह्मणपादरेणवः ॥ इति मन्त्रेण ॥

आचार्य, ब्राह्मण यथाशक्ति अपने-अपने गृह्यसूत्रों के अनुकूल वेदोक्त मन्त्रों से कहें । यजमान को यथाशक्ति वरण करना चाहिये ।

चरणौ प्रक्षाल्य, हरिद्रया रोचनां कुर्यात् ।

यजमान को अपने आचार्य के चरणों का प्रक्षालन करके तिलक करना चाहिये । यथा मन्त्रः—

ॐ युञ्जन्ति ब्रध्नमरुषञ्चरन्तम्परितस्थुषः । रोचन्ते रोचनादिवि ॥

ॐ तरणिर्विश्वदर्शतोज्योतिष्कृदसि सूर्य्यः । विश्वमाभासि रोचनम् ॥

ततो दक्षिणां संकल्प्य, दद्यात् ।

यथाशक्ति दक्षिणा आचार्य्यादिकों को देना चाहिये । तत्र संकल्पः । यथा—

ॐ तत्सदद्यवर्त्तमानामुकमासीयामुकपक्षीयामुकतिथावमुकगोत्रशाखाध्यायी, अमुकशर्म्मादिरस्मिन्यज्ञे, अमुकगोत्रशाखाध्यायिनममुकशर्म्माणं ब्राह्मणमेभिः पूगीफलवस्त्रयज्ञोपवीतदक्षिणाभिराचार्य्यत्वेन त्वामहं वृणे।

इस प्रकार यजमान संकल्प करके यथाशक्ति आचार्य को दक्षिणा देवे। आचार्य स्वस्ति कहे। यथा—

वृतोऽस्मीति प्रतिवचनम्। ऐसा आचार्य कहे।

ततः कन्याभ्राता वान्यो यथाविधि संगृहीतार्हणः कुमारवरणमाचरेत्।

तिलक (फलदान) के लिए कन्या का भाई व अन्य लोग जो आये हों सो विधिपूर्वक वर (कुमार) का पादप्रक्षालन करके वरण करना चाहिये। बाद यथाशक्ति अपने-अपने देशाचार के अनुकूल कुमार के सकुटुम्बी लोगों का वरण करना चाहिये। तत्र मन्त्रः यथा—

ॐ नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे। सहस्रनाम्ने

पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥ इति पादौ प्रक्षाल्य । दधिरोचनया मन्त्रेण तिलकं कुर्यात् ।

इस मन्त्र से कन्या का भ्राता या अन्य लोग जो आये हैं वे अपने दोनों हाथों में जल लेकर कुमार के दोनों पैरों को तीन बेर बड़े प्रेम से स्पर्श करके अपने मस्तक में लगावें फिर हाथ धो डालें । दधि रोचनादिकों से तिलक करें । यथा––

ॐ युञ्जन्ति ब्रध्नमरुषञ्चरन्तम्परितस्थुषः रोचन्ते रोचनादिवि ॥

ॐ तरणिर्विश्वदर्शतोज्योतिष्कृदसि सूर्यः । विश्वमाभासि रोचनम् ॥

इस मन्त्र से तिलक करना चाहिये ।

ततो रजतादिपात्रे, वस्त्र हरिद्रा पूगीफल श्रीफल यज्ञोपवीत तन्दुलाक्षतानि दक्षिणहस्ते गृहीत्वा । संकल्पं कुर्यात् ॥

कन्या के यहां से जो सामान आया है उसको कन्या का भाई अपने दहिने हाथ में सामान को रखकर संकल्प करे । यथा–

ॐ तत्सदद्येहेत्यादि, अमुकगोत्रोऽमुकप्रवरोऽमुकशर्म्मादिरमुक्तगोत्रप्रवरशाखाध्यायिनः प्रपौत्रीं, पौत्रीं, पुत्रीममुकनाम्नीं विवाहयज्ञेऽमुकगोत्रशाखाध्यायिनोऽमुकशर्म्मणः प्रपौत्राय, पौत्राय, पुत्रायामुकशर्म्मणे कुमाराय, दातुमेभिर्य्यथालब्धोपचारैर्वाग्दानमहं करिष्ये । इति संकल्प ॥

इस प्रकार संकल्प किया हुआ थाल्य (कन्या के तरफ से जो वस्तु आई) को अपने हाथ में रक्खे रहें, और आचार्य्य कन्या के तरफ से यह कहे कि,

कन्याप्रति—यदि त्वम्पतितो न स्याद्दशदोषविवर्ज्जितः[1]।
पिताते दास्य ते कन्यां देवाग्निगुरुसन्निधौ ॥

आचार्य्य—कुमार के सामने कन्या की तरफ से ऐसी प्रतिज्ञा करके, अब कुमार के तरफ प्रतिज्ञा करे कि, ततो वरः पठेत् यथा——

---

१ महान्त्यपि समृद्धानि विगोत्राधनधान्यतः । स्त्रीसम्बन्धे दशैतानि कुलानि परिवर्जयेत् ॥

दश कुलों के लक्षण व कन्या के दोषों को कहते हैं ।

हीनक्रियं निष्पुरुषं निश्छन्दो रोमशार्शसम् । क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि च ॥ नोद्वहेत्कपिलां

वरप्रति–यदि कन्या गुणोपेता *सर्वलक्षणसंयुता ।

कन्यां नाधिकांगीं न रोगिणीम् । नालोमिकां नातिलोमां न वाचाटीं न पिंगलाम् ।। नर्क्षवृक्षनदीनाम्नीं नांत्यपर्वतनामिकाम् । नापक्षमहिप्रेष्यनाम्नीं न च भीषणनामिकाम् ।। अव्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम् । तनुलोमकेशदशनां मृद्वङ्गीमुद्वहेत्स्त्रियम् ।। मनुस्मृति अध्याय ३ श्लोक ६–१० ।।

इन दश कुलों को विवाह में बर्ज देवे । इस निषेध में प्रमाण यह है कि उत्पन्न हुए लड़के अपने मातुल के समान रोगी बा नीरोगी होते हैं, जिससे हीनकुल से विवाही स्त्री की संतान भी वैसी ही होगी । क्योंकि वैद्यक में ऐसा लिखा है कि-"सर्वे संचारिणो रोगा वर्जयित्वा प्रवाहिकाम्" ।। प्रवाहिका को छोड़कर सब रोग संचारी होते हैं। अर्थात् पीढ़ी दर पीढ़ी चले जाते हैं। इससे कन्या के दोष भी अवश्य देखकर विवाह करे । देखो व्यासजी ने क्या कहा है—

"प्रतीक्षेत विवाहार्थमनिंद्यान्वयसभवाम् । अरोगादुष्टिवंशोत्थामशुल्कादानदूषिताम् । सवर्णामसमानार्षाममातृपितृगोत्रजाम् । अनन्यपूर्विकां लघ्वीं शुभलक्षणसंयुताम् ।। धृताधोवसनां गौरीं विख्यातदशपूरुषाम् । ख्यातनाम्नः पुत्रवतः सदाचारवतः सतः ।। दातुमिच्छोर्दुहितरं प्राप्य धर्मेण चोद्वहेत ।। व्यासस्मृति अध्याय २ श्लोक १–४ ।।

*ततः कुमारपितरं प्रति वाग्दाता वदति–

एतद्वर्षा त्वियं कन्या पुत्रवत्पालिता मया । इदानीं त्वत्पुत्राय दत्ता स्नेहेन पाल्यताम् ।। **ततः कुमारं प्रति-**

तदाहं प्रतिगृह्णामि देवाग्निगुरुसन्निधौ ॥

जब ऐसी आचार्य दोनों तरफ की प्रतिज्ञायें कर चुके, तब कुमार का पिता यह वाक्य कन्या के तरफवाले के सामने कहे कि मेरा पुत्र, तुम्हारी कन्या को शास्त्र के अनुकूल (साक्षी) ग्रहण करता है, सो मैं तुम्हारी दी हुई कन्या को भी पुत्र के समान पालन करूंगा। लेकिन तुम्हारे कुल में वा कन्या में कोई तरफ का दोष देखा सुना जायगा तो मेरा पुत्र तुम्हारी दी हुई कन्या को परित्याग कर देगा इसमें संशय नहीं है, मैं सत्य प्रतिज्ञा से कहता हूं। इस हमारे वचन को सत्य मानकर तुम खुशी से मेरे पुत्र को अपनी कन्या दे दो ॥

तद्वरणसामग्रीं पित्रे वा पितामहाय कुमारः प्रयच्छति ।

वदति–वाग्दान हि मया दत्तमन्यद्वरनिवर्त्तकम् । वरो भव त्वं कन्याया गृहीत्वा मेऽनुशासनम् ॥ **कुमारः**– वरान्तरनिवृत्यर्थं वाग्दानं यत्मृतन्त्वया । वरो भवामि कन्याया गृहीतन्ते वचोऽमृतम् ॥

कुमारः यथा–"न दत्त्वा कस्यचित्कन्यां पुनर्दद्याद्विचक्षणः । दत्त्वा पुनः प्रयच्छन् हि प्राप्नोति पुरुषानृतम् ॥ विधिवत्प्रतिगृह्यापि त्यजेत्कन्यां विगर्हिताम् । व्याधितां विप्रदुष्टां वा छद्मना चोपपादिताम् ॥ यस्तु दोषवतीं कन्यामनाख्यायोपपादयेत् । तस्य तद्वितथं कुर्यात्कन्यादातुर्दुरात्मनः ॥" मनुस्मृति अध्याय ९ श्लोक ७१-७३ ॥

आचार्य से कन्या की तरफ के लोग पूछें कि हमें क्या आज्ञा होती है, तब आचार्य ऐसा कहे। यथा–

थालीस्थं सर्वमुपस्करं कुमारहस्ते समर्प्य पठेत्।

आचार्य कहे––कुमार के हाथ में तुम समर्पण कर दो अर्थात् दे दो।

आचार्य कुमार से इष्टदेव व कुलदेव का स्मरण कराकर पृथ्वी पर रख देने को कहे। बाद आरती करे तिसका मन्त्र पढ़े–"ॐ अग्निर्व्वर्चोज्योतिर्वर्च्चेति०।" तदनन्तर आचार्य तांबूल का बीरा या फूल, अक्षत कुमार या कन्या के भाई के हाथ में दे दोनों तरफ से बदला कर दोनों में खड़े कराकर भेंट करा देवे। और यह कहे कि "रुचन्नोधेहि।" अब देवताओं से प्रार्थना करे। यथा–

ततो देवान् प्रार्थ्य मन्त्रहीनं क्रियाहीनमिति मन्त्रेण।

इस प्रकार देवताओं की प्रार्थना करे। अब वाग्दानसांगता का संकल्प करे। यथा––

ॐ तत्सदद्येहेत्यादिदेशकालादीनुपकीर्त्य, अमुकगोत्रप्रवरशर्म्मादिः कृतैत-

द्वाग्दानप्रतिष्ठासांगतासिद्ध्यर्थमेतद्द्रव्यं यथानामगोत्रायाहं सम्प्रददे ।

देवान्, गच्छ गच्छ सुरश्रेष्ठ, इति मन्त्रेणाक्षतप्रक्षेपादिना विसृज्य। ततोऽभिषेकं कुर्य्यात्। अभिषेकमन्त्रस्तु ।

वाग्दान का संकल्प करके अभिषेक करे । यथा——

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम् । अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्च्चसायाभिषिञ्चामि सरस्वत्यै भैषज्येन वीर्य्यायान्नाद्याया-भिषिञ्चामीन्द्रस्येन्द्रियेण बलाय श्रियै यशसेभिषिञ्चामि ॥ पालाशम् भवति ब्रह्मणोऽभिषिञ्चति ब्रह्मपालाशो ब्रह्मणैवमेतदभिषिञ्चति । यद्वै विकल्पं जुहोति प्राणा वैकल्पं जुहोति॥ प्राणवैकल्पा अमृतमुवै प्राणा अमृतेनैवेनमेतदभिषिञ्चति। सर्वेषां वायेषदेवानाᳬ रसेनाभिषिञ्चति॥ सर्वतीर्थाभिषेकोऽस्तु ॥ इत्यभिषेकः ॥

इस प्रकार अभिषेक करना चाहिये । बाद आचार्य को दक्षिणा देकर, यह मंत्र पढ़े । यथा—

ॐ ऋतस्थ ऋतावृध ऋतुष्ठांस्थ ऋतावृधः घृतश्चतो मधुश्चतो विराजोनाम कामरुधाआक्षीयमाणः । ऋतवस्थेह्यतवोह्येताऋतावृतइतिसत्यवृधइत्येतद्दतुष्टास्थ ऋतावृध इत्यहोरात्राणि वा पुष्टाकाऋतुषु वा अहोरात्राणि तिष्ठन्ति घृतश्चतो मधुश्चत तदेनां घृतश्चतश्च मधुश्चतश्च कुरु ते ॥ विराजोनामेत्येतद्धैदेवाएता-इष्टकानामभिरूपाकयंतयथायथैनामेतदाचक्षते तायेनानाभ्युपावर्त्ततायलोकं प्रणा-एवपराध्यस्तस्थुर्हितनाम्नो निमेनहः तस्थाविराजोनामा कुर्वन्तताएनानाभ्युपावर्त्त-तदस्मादशदशेष्टका उपधायलोके प्रणयामि मन्त्रयते तदेनाविराजः कुरुते दशाक्षराहिविराट् कामरुधः अक्षीयमाणाइति तदेनाकामरुधा अक्षीयमाणः कुरुते ॥ १-३ ॥

तिलकम्—ॐ युञ्जन्ति ब्रध्नमरुषञ्चरन्तम्परितस्थुषः । रोचन्ते रोचनादिवि ॥ ॐ तरणिर्विश्वदर्शतोज्योतिष्कृदसि सूर्य्यः । विश्वमाभासिरोचनम् ॥

इन मन्त्रों से तिलक करे, अब भूयसी दक्षिणा करनी चाहिये। ततो भूयसी दक्षिणां दद्यात्।

यथा संकल्पः——

ॐ तत्सदद्यामुकनाम्नः कुमारस्य कृतैतद्वाग्दानकर्म्मसाङ्गतासिद्ध्यर्थं भूयसीं दक्षिणां नानानामगोत्रेभ्यो दातुमहमुत्सृजे॥

अब आचार्य को आशीर्वाद देना चाहिये। यथा——

ॐ पुनस्त्वादित्या रुद्रा वसवः समिन्धताम्। पुनर्ब्रह्माणोवसुनीथयज्ञैः॥ घृतेनत्वन्तन्वंवर्द्धयस्व, सत्यास्सन्तु यजमानस्य कामाः॥ श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते। धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः॥ मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः। शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव॥

अब आचार्य ऐसी आज्ञा दे। यथा——

ततो नापितपुरोहितादीन् सन्तोष्य, कुमारमुत्थाय तस्य हस्ते वरणसामग्रीं घृत्वा तत्पृष्ठतस्सुभगासालंकृतानापिता जलदानपूर्व्वकमन्तःपुरे श्रीकुलदेवगृहे, कुलवृद्धपौरवर्तिनी सुमुखी परिवृते गत्वा तान्नमस्कृत्य, ततवास्तुकं समर्प्य वृद्ध-वर्गं पौरवर्गं नत्वाशिषः प्राप्य, बहिर्द्देशे संप्राप्तान् गोत्रबन्धुपौरवर्गान् प्रणम्य भोजनादिदक्षिणांतं दत्त्वा विसृजेदिति ।

नाई, बारी, माली, कहार इत्यादि परजों को निछावर देना चाहिये ।

इसके बाद कन्या की तरफ से कुमार के बंधुवर्गों को और जो तिलक के समय आये हों उन सबको दक्षिणा देनी चाहिये ।

इति फलदानविधि ।

———

अथ शुभकर्म ।

पांच या सात सौभाग्यवती स्त्री गेहूं को सूप से पछोरें और उर्द की दाल की पिड़िया काठ के पाटे पर पांच या सात या देशाचार तथा अपने कुल की प्रथा के अनुसार धर कर सिन्दूर से पूजन करें । इति शुभकर्म समाप्त ।

अथ गीतारम्भः ।

पांच या सात सौभाग्यवती स्त्री एकत्र होकर गीत-मांगल्य याने मंगल गान करें, और चावल व बतासों से गोद (कोछे) में भर लेवें । इसी प्रकार मांगल्य कर्म्म भी होता है। इति गीतारम्भ समाप्त ।

अथ क्षयी-यन्त्रीपूजनम् ।

प्रथम गोबर से देव पितरों का स्थान शुद्ध कर आम की लकड़ी व फूल माला रखकर उर्द को चक्की (दरेंती) से दरें और मंगल गान करें । घी, गुड़ से पूजन करें और कहीं-कहीं

जगहों पर गणेशजी की पूजन भी होती है। फिर जैसा अपने-अपने कुल की प्रथा हो वैसा करना ठीक है। इति क्षयी-यन्त्री पूजन समाप्त।

अथ रात्रिजागरणम् ।

इन सब कर्मों के समाप्त होने पर रात्रि में अपने देशाचार के अनुकूल जागरण करें और यही प्रार्थना परमेश्वर से करती रहें कि विवाह निर्विघ्न समाप्त हो जावे। इति रात्रि-जागरणम् ।

अथ स्तम्भारोपणम् ।

घर का आंगन गौ के गोबर से लीपकर मध्य में चौक पूरे और पूजन की सामग्री एकत्र कर स्तम्भ को शुद्ध जल से धोवायकर अपने देशाचार व कुल की प्रथा के अनुसार गेरू से रँगकर रक्खे। बाद चौक के सामने पूर्व की तरफ शुद्ध आसन पर पिता या पितृव्य व भ्राता इत्यादि बैठकर आचमन कर और पवित्री धारण कर जल, अक्षत, सुपारी, द्रव्य लेकर संकल्प करें। यथा—

ॐ तत्सदद्येहेत्यादि अमुकगोत्रः अमुकशर्माहं अमुक्याः कन्यकायाः विवाह-कर्म्मणि वा अमुककुमारस्य विवाहांगत्वे स्तम्भारोपणकर्मणि गणेशवरुणगौरीणां पूजनमहं करिष्ये ।

संकल्प के बाद आचार्य का वरण करे । यथा——

ॐ नमोस्त्वनन्ताय सहस्रमूर्त्तये सहस्रपादाक्षिशिरोरुबाहवे । सहस्रनाम्ने पुरु-षाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥ इति पादौ प्रक्षाल्य दधिरोचनया मन्त्रेण तिलकं कुर्यात् ॥

ॐ युञ्जन्ति ब्रध्नमरुषञ्चरन्तम्परितस्थुषः । रोचन्ते रोचनादिवि ॥

ॐ तरणिर्विश्वदर्शतोज्योतिष्कृदसि सूर्य्य । विश्वमाभासि रोचनम् ॥

तिलक के बाद फिर फल, द्रव्य और अक्षत ले संकल्प करे । यथा——

ॐ अद्येहेत्यादिश्रुतिस्मृतिपुराणोक्तपुण्यफलप्राप्तिकामः विवाहांगे स्तम्भारो-

पणकर्मणि अमुकगोत्रं अमुकशर्माणं ब्राह्मणमेभी रोचनाक्षतपूगफलद्रव्यैराचा-
र्यत्वेन त्वामहं वृणे । व्रतोस्मीति प्रतिवचनम् ॥

तिसके पश्चात् पांच या सात ब्राह्मणों का वरण करना चाहिए। तदनन्तर गर्त में वाराहजी का पूजन करे। यथा---

ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री ॥ पृथिवीं यच्छ पृथिवीन्दृꣳह पृथिवीम्माहिꣳसीः ॥

ॐ इदं विष्णुर्विचक्रमे त्रेधानिदधे पदम् ॥ समूढमस्य पाꣳसुरे स्वाहा ॥

इन दो मंत्रों से जल, अक्षत, पुष्प, धूप, दीप, नैवेद्य, ताम्बूल, पूगफल, द्रव्यादि से वाराह (पृथ्वी) जी का पूजन कर शेषजी का पूजन करना चाहिए। यथा---

ॐ नमोस्तु सर्पेभ्यो ये के च पृथिवीमनु । येऽअन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥

शेषजी का पूजन कर, वस्त्र, कुंकुम, अक्षत, सुपारी, फल, द्रव्य गर्त के भीतर बगल में धर, पाँच आदमी मिलकर स्तम्भ को गर्त में स्थापित करके मध्य में तृण व आम, गूलर की डार स्तम्भ के साथ धर पूजन करे।

ॐ स्तम्भाय नमः। ॐ स्तम्भाधिष्ठातृदेवताभ्यो नमः।

इससे स्तम्भ के ऊपर जल छोड़े। और—ॐ ब्रह्मणे नमः। यथा—

ॐ ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोव्वेनऽआवहः॥ सबुध्न्याऽउपमा-ऽअस्य विष्ठाः सतश्च योनिमसतश्चविवः॥

इस मंत्र से ऊर्ध्वभाग में ब्रह्माजी का पूजन कर तदनन्तर यथा—

ॐ विष्णवे नमः। इदं विष्णुरिति मंत्रेण।

मध्य भाग में विष्णुदेवजी का पूजन कर स्तम्भ के अन्त्यभाग में शिवजी का पूजन करे।

ॐ नमः शिवाय, नमस्ते रुद्रमन्यवेति, तमीशानज्जगतस्तस्थुषस्पतिन्धिय-ज्जिन्वमवसेहूमहेव्वयम् पूषानो यथाव्वेद सामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये॥

पाठ भेद है पद्धतिकारों ने ऐसा ही कहा है।

ॐ नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥

इस प्रकार शिवजी का पूजन करे—**ध्वजे ध्वजाय नमः** । तृणगुच्छ में **ॐ यक्षेभ्यो नमः** इस प्रकार पूजन कर कलश स्थापन करके पूर्वोक्त गणेश, वरुण, गौरी, जलाक्षत, द्रव्यादि से **आवा-हनपूर्वक** पूजनार्थ संकल्प करे। यथा—

ॐ अद्येहेत्यादि प्रतिज्ञोक्तफलप्राप्तये यथालाभसामग्र्यादिना गणेशादीनां पूजनमहं करिष्ये ॥

ॐ गं गणपतये नमः ॥ॐ गणानान्त्वा गणपतिᳬहवामहे प्रियाणान्त्वा प्रियपतिᳬहवामहे निधीनान्त्वा निधिपतिᳬहवामहे व्वसो मम ॥ आहमजानिगर्भधमात्वमजासिगर्भधम् ॥ ॐ भूर्भुवः स्वः गणपत इहागच्छेह तिष्ठ ॥

गौरी का मंत्र। यथा—

धमात्वमजासिगर्भधम् ॥ ॐ भूर्भुवः स्वः गणपते इहागच्छेह तिष्ठ ॥

गौरी का मंत्र । यथा– ३८

ॐ श्रीश्चते लक्ष्मीश्च पत्न्या वहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ॥ इष्णन्निषाणा मुम्मऽइषाण सर्व्वलोकम्मऽइषाण ॥ ॐ भूर्भुवः स्वः गौरि इहा-गच्छेह तिष्ठेति ॥

वरुण का मंत्र । यथा–

ॐ इमम्मे वरुणश्श्रुधीहवमद्या च मृडय ॥ त्वमवस्स्युराचके ॐ भूर्भुवः स्वः वरुणेहागच्छेह तिष्ठेति ॥

इन पूर्वोक्त मंत्रों से जल, कुंकुम, अक्षत, पुष्प, धूप, दीप, नैवेद्य आदि देकर नमस्कार करे । प्रदक्षिणा कर समर्पण करे, संकल्प पढ़े । यथा–

ॐ अद्येहेत्यादिकृतयानया पूजया धूपदीपनैवेद्यादिकतया गणेशगौरीवरुणाः प्रीयन्ताम् ॥

तदनन्तर ऐपन से पांच या सात थापे लगावे, ये मातृका स्वरूप हैं । इस कारण घी, गुड़ लगावे, फिर अभिषेक तिलक करे और ब्राह्मणों को दक्षिणा देवे ॥ इति स्तम्भारोपणम् ॥

अथ तैलाभ्यंगम् ।

तैलाभ्यंग की सामग्री—तैल, दूर्वा, हरिद्रा, कलावा, लोहे के छल्ले पांच या सात, काठ के दो पीठा याने पटरे, कुमारी कन्या, सौभाग्यवती स्त्री पाँच वा सात, आटा, अक्षत, फूल, माला, धूप, दीप, बतासे, पान, सुपारी आदि ।

सामग्री ले प्रथम ग्राम-देवी, देवतों का तैलाभ्यंग कर फिर कुमार या कन्या का तैलाभ्यंग करे तिसकी रीति यह है कि प्रथम कुमार या कन्या की अंजुली अन्न व द्रव्य से पूर्ण करके अपने पितरों को नमस्कार कराय चौक पर लावे तब आचार्य स्वस्तिवाचन करें और स्त्रियाँ मंगलगान करें, तदनन्तर आचार्य अंजुली लेकर कुमार या कन्या को आचमन करावे, फिर पवित्री धारण कर गणेश आदिकों का पूर्वोक्त विधान से पूजन करावे और इस प्रकार संकल्प करे । यथा—

ॐ अद्येहेत्यादि बीजगर्भजनितदोषपरिहारार्थं विवाहांगे तैलाभ्यंगकर्मणि गणेशगौरीवरुणानां पूजनं करिष्ये ।

ॐ भूर्भुवः स्वः गणपत इहागच्छेह तिष्ठेति गणानांत्वेति मंत्रेण ॥

ॐ भूर्भुवः स्वः गौरि इहागच्छेह तिष्ठेति श्रीश्चतेति मंत्रेण ॥

ॐ भूर्भुवः स्वः वरुण इहागच्छेति इमम्मेति मंत्रेण ॥

इस प्रकार पूजन कर पश्चात् समर्पण करे । यथा—

ॐ अद्येहेत्यादि कृतेनानेन पूजनेन गणेशादयः सुप्रीताः भवन्तु ॥

फिर रक्षाबंधन करे अर्थात् चोकरा, सरसों, चावल, हरदी, पीला वस्त्र (नवीन होना चाहिये) रखकर पीले डोरे से पोटली बाँधे । और लोहे के छल्ले समेत बनावे, जितनी जरूरत हो बाद एक कलश में, स्तम्भ में, पीठा में, वर के दहिने हाथ में, कन्या के बांयें हाथ में बांधे । यथा—

अथाम्रपल्लवं रामनामाङ्कितम्पीतसूत्रेण संवेष्ट्य कुमारस्य दक्षिणहस्ते कन्याया वामे निबध्नीयात् । मंत्रः । यथा—

ॐ यदाबध्नन्दाक्षायणा हिरण्यꣳ शतानीकाय सुमनस्य मानाः ॥ तन्मऽआ-बध्नामि शतशरदायुरस्माञ्जरदष्टिर्यथा सम ॥

अथ हरिद्राचूर्णन्तैलेन सहविमर्द्य दूर्वाभिश्च लेपयेत् ॥

रक्षाबंधन के उपरांत हाथों को जोड़कर पूगीफल व द्रव्य धर कर माता पिछाड़ी बैठकर (चाची, बड़े भाई की स्त्री इत्यादि) थाली में आरती साजकर आचार्य तैलाभ्यंग करे अर्थात् पाद से घुटने व कन्धे व कान तक लगावे फिर आरती करे तदनन्तर रोचना मस्तक में देय फूलमाला पहिरावे तिसके बाद कुमारी कन्या तैलाभ्यंग दूब से करें और यह मंत्र पढ़ें । यथा—

काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ॥ एवानो दूर्व्वे प्रतनु सहस्रेण शतेन च ॥

तिसके अनन्तर सौभाग्यवती स्त्री तैलाभ्यंग करे फिर आरती कर पैसा तैल में डाले तदनन्तर समर्पण करे। देशाचार कुल की प्रथा के अनुकूल तैलाभ्यंग करे जैसा होता हो।

ॐ अद्येहेत्यादिकृतैतत्तैलकर्मणः सांगत्यप्राप्तये ताम्रमयीं दक्षिणां तुभ्यमहं संप्रददे। ततः–

विसर्जन करे यह मंत्र पढ़े। यथा–

यान्तु देवगणाः सर्वे पूजामादाय मामकीम्।
इष्टकामप्रदानाय पुनरागमनाय च ॥

तदनन्तर तिल लेकर अर्घ दे कुमार या कन्या को उठावे। इति तैलाभ्यंगकर्म।

अथ मातृकापूजनम् ।

आत्मनः कुलदेवता १७	लोकमातरः १३	देवसेना ९	मेधा ५
तुष्टिः १६	मातरः १२	जया ८	शची ४
पुष्टिः १५	स्वाहा ११	विजया ७	पद्मा ३
धृतिः १४	स्वधा १०	सावित्री ६	गणेश १ गौरी २

इति षोडशमातृकाचक्रम्

अथ सप्तघृतमातृका ।

॥ श्री ॥



कीर्तिर्लक्ष्मीर्धृतिर्मेधा स्वाहा प्रज्ञा सरस्वती ।
मांगल्येषु प्रपूज्यन्ते सप्तैता घृतमातरः ॥ १ ॥

इति वसोर्धारा ॥

अथ मातृ-पूजापूर्वकमाभ्युदयिकश्राद्धम् ।

अविघ्नो मंडपश्चैव मातॄणां पूजनं सकृत् । तैश्च देवं वसोर्द्धारांनांदीश्राद्धमतः परम् ॥ विवाहोपनयनचूडाकरणसीमंतोन्नयनादौ । मोदश्चैव प्रमोदश्च सुमुखो दुर्मुखस्तथा । अविघ्नो विघ्नहर्त्ता च षडेते विघ्ननायकाः ॥

मातृपूजन की सामग्री--दूर्वा, अक्षत, हरिद्रा, दही, रोचना, तांबूल, सुपारी, फूलमाला, तुलसी, यव, घी, वस्त्र, ऐपन, आटा, उर्द की दाल, मूसल, सिल, लोहा, चूल्हा, छ्यी की लकड़ी, मटुकी, हंडिया पाँच वा सात, गोबर की पिड़िया १६, पत्ता, दोना, पतरी, दिउल, चावल इत्यादि सामग्री मंडप के नीचे धरे ।

कर्त्तव्यता—प्रातःकाल अथवा गोधूलि के समय स्नान नित्यक्रिया कर कुमार का पिता हाथ पांव धोय कर आचमन करे और आभ्युदयिक श्राद्ध[1] को प्रारम्भ करे । संकल्पः यथा--

ॐ तत्सदद्येहेत्यादि प्रतिज्ञोक्तफलावाप्तये विवाहांगे आभ्युदयिकश्राद्धविशेष-मातृकागणेशवरुणगौरीणां पूजनमहं करिष्ये ।

---

१ आभ्युदयिक (नांदीमुख) श्राद्ध अन्यत्र पद्धतियों के अनुकूल अवश्य करे ।

तदनन्तर कलश स्थापनपूर्वक गणेश वरुण गौरी आदि का पूजन कर मातृकाओं का पूजन करे। संकल्पः यथा--

ॐ तत्सदद्येहेत्यादि अस्य कुमारस्य विवाहांगत्वेन मातॄणां पूजनमहं करिष्ये। ॐ अद्येहेत्यादि देशकालादिवाक्यानन्तरं मम पुत्रस्य कन्याया वा विवाहाङ्गतया तृणतोरणादिमातॄणाम्पूजनमहं करिष्ये॥ इति संकल्प्य॥

अब तृणमाताओं के नाम कहते हैं।

ॐ भूर्भुवः स्वः तृणतोरणमातर इहागच्छन्तु इह तिष्ठन्तु। पाद्यमर्घ्यमाचमनीयम्॥

ॐ नन्दे नन्दनि वाशिष्ठे वसुदेवे च भार्गवे। जये च विजये चैव सप्तैतास्तृणमातरः॥

अन्यत्र पाठान्तर। यथा--

ॐ लक्ष्मीः क्षेमंकरी चैव शुभगा च महोदरी । माया चैव शची मेधाः समैता-स्तृणमातरः ॥

अबतोरण माताओं के नाम कहते हैं ।

कुमारी धनदा नन्दा मंगला विमला बला । जयेति शुभदा प्रोक्ता सप्ततो-रणमातरः ॥

अन्यत्र पाठान्तर । यथा---

कुमारी धनदानन्दा सावित्री विमला जया । पद्मिनी चैव गणिता सप्ततो-रणमातरः ॥

अब स्तम्भमाताओं के नाम कहते हैं ।

ॐ भूर्भुवः स्वः स्तम्भमातर इहागच्छन्तु इह तिष्ठन्तु ।

ब्राह्मी माहेश्वरी चैव कौमारी भुवनेश्वरी । वाराही चैव रुद्राणी चामुण्डा भैरवी तथा ॥

क्षेमंकरी जयंती च सावित्री विश्वरूपिणी। सिंही भगवती लक्ष्मीः षोड-शस्तम्भमातरः॥

ॐ भूर्भुवः स्वः स्तम्भमातर इहागच्छन्तु इह तिष्ठन्तु।

अब औदुम्बर माताओं के नाम कहते हैं।

औदुम्बरी च कमला यशोदा शुभगा भगा। जयन्ती क्षीरवृक्षी च अष्टौ-दुम्बरमातरः॥

ॐ भूर्भुवः स्वः औदुम्बरमातर इहागच्छन्तु इह तिष्ठन्तु॥

अब मृण्मयमाताओं के नाम कहते हैं।

पार्वती धेनुका भूम्ना चामुंडा चंडिका तथा। मृत्तिका सर्वकुम्भाख्या एका-मात्रा पुनः पुनः॥

ॐ भूर्भुवः स्वः मृण्मयमातर इहागच्छन्तु इह तिष्ठन्तु सन्निधानं कुर्वन्तु।

अब दक्षिणद्वारमाताओं के नाम कहते हैं।

नन्दिनी च वशिष्ठा च वसुदेवा च भार्गवाः। जया च विजया चैव सप्तैता द्वारमातरः॥

ॐ भूर्भुवः स्वः द्वारमातर इहागच्छन्तु इह तिष्ठन्तु इह सन्निधानं कुर्वन्तु।

अब वामद्वार की माताओं के नाम कहते हैं।

कामिनी च शिवा देवी तारिणी च तथाश्विनी। पिंगला च हरिद्रा च सप्तैता द्वारमातरः॥

ॐ भूर्भुवः स्वः वामद्वारमातर इहागच्छन्तु इह तिष्ठन्तु इह सन्निधानं कुर्व्वन्तु।

अब गोमयमाताओं के नाम कहते हैं।

आदितिर्धन्या तथा गौरी युवती रम्भा च मेनका। विश्वतापापहन्त्री च अनन्ता पुष्टिवर्द्धिनी॥

जीववत्सा च वत्सा च क्षयगोमयमातरः ॥

ॐ भूर्भुवः स्वः गोमयमातर इहागच्छन्तु इह तिष्ठन्तु इह सन्निधानं कुर्वन्तु ।

अब जलमाताओं के नाम कहते हैं ।

मत्सी कूर्मा जलौका च दुर्दरी गण्डकी तथा । दुर्गा कौर्मी रेवती च नन्दिनी कांतिनी तथा ॥

मकरी तंदुकी चैव सप्तैता जलमातरः ॥

ॐ भूर्भुवः स्वः जलमातर इहागच्छन्तु इह तिष्ठन्तु इह सन्निधानं कुर्वन्तु ।

अब पाषाणमाताओं के नाम कहते हैं ।

अहिल्या पार्वती चैव लोपा मुद्रा सरस्वती । तारा मन्दोदरी चैव रम्भा तप्त-गुणावृता ॥

मङ्गलेषु प्रपूज्यन्ते सप्तपाषाणमातरः ॥

ॐ भूर्भुवः स्वः पाषाणमातर इहागच्छन्तु इह तिष्ठन्तु इह सन्निधानं कुर्वन्तु ।

अब ज्योतिमाताओं के नाम कहते हैं ।

कल्याणी मङ्गला लक्ष्मीः शुभगा वृद्धिजा मता । सीता रम्भा यशोदा च दशैता ज्योतिमातरः ॥

ॐ भूर्भुवः स्वः ज्योतिमातर इहागच्छन्तु इह तिष्ठन्तु इह सन्निधानं कुर्वन्तु ।

अब गौरी आदि सोलह माताओं के नाम कहते हैं ।

गौरी पद्मा शची मेधा सावित्री विजया जया । देवसेना स्वधा स्वाहा मातरो लोकमातरः ।

धृतिः पुष्टिस्तथा तुष्टिरात्मदेवतया सह । पूज्यनीया सदा सर्वा सर्वकार्येषु शर्मदाः ॥

ॐ भूर्भुवः स्वः गौर्यादिषोडशमातर इहागच्छन्तु इह तिष्ठन्तु ।

इस प्रकार माताओं का आवाहन प्रतिष्ठा कर पूजन करने का संकल्प इस भांति करे ।

ॐ तत्सदद्येहेत्यादि विवाहागत्वे आसां मातॄणां यथालाभसामग्र्या पूजनं करिष्ये मातृभ्यो नमः। एषोऽर्घः। एतत्पाद्यं, एतदाचमनीयं, एतत्स्नानीयं, एतानि रोचनाक्षतधूपदीपनैवेद्यादीनि तुभ्यं नमः।

इस प्रकार माताओं का पूजन कर बाद देवताओं का निमन्त्रण करे। यथा—

ब्रह्मदेव इहागच्छेह तिष्ठ। विष्णुदेव इहागच्छेह तिष्ठ। शिवदेव इहागच्छेह तिष्ठ। गणपतिदेव इहागच्छेह तिष्ठ। लक्ष्मीदेवि इहागच्छतु इह तिष्ठतु। सरस्वतीदेवि इहागच्छतु इह तिष्ठतु। सूर्यादिनवग्रहः देवा इहागच्छन्तु इह तिष्ठन्तु। गङ्गादेवि इहागच्छ इह तिष्ठ। इन्द्रादिदशदिग्पाला इहागच्छन्तु इह तिष्ठन्तु। यमुनादेवि इहागच्छ इह तिष्ठ। गोदावरीदेवनदि इहागच्छ इह तिष्ठ। सिन्धुदेव इहागच्छ इह तिष्ठ। कावेरि देवि इहागच्छ इह तिष्ठ। अग्निदेव इहागच्छ इह तिष्ठ। चन्द्रमादेव इहागच्छ इह तिष्ठ। विश्वेदेवा चतुर्दशदेवता इहागच्छन्तु इह

तिष्ठन्तु । वरुणदेवता इहागच्छेह तिष्ठ । चत्वारो वेदाः इहागच्छन्तु इह तिष्ठन्तु । अष्टाशीतिसहस्रऋषयः इहागच्छन्तु इह तिष्ठन्तु । चतुराशीतिगणाः इहागच्छन्तु इह तिष्ठन्तु । सम्पूर्णदेवगणा इहागच्छन्तु इह तिष्ठन्तु ।

इस प्रकार देवताओं का निमन्त्रण कर पश्चात् पितरों का निमन्त्रण करे । यथा---

अमुकगोत्राः अमुकप्रवराः अमुकशर्माणः अस्मत्पितरः निमन्त्रिताः इहागच्छन्तु इह तिष्ठन्तु ।

अमुकगोत्राः अमुकप्रवराः अस्मन्मातामहाः सपत्नीकाः निमन्त्रिताः इहागच्छन्तु इह तिष्ठन्तु । प्रसन्ना भवन्तु मङ्गलानि दद्युः ।

इस प्रकार निमन्त्रण कर कुल-देवता, कुल-देवी, ग्राम-देवता-ग्राम-देवी सम्पूर्ण देवताओं का रोचनाक्षत पुष्पादिकों से पूजन करके सांगता का संकल्प करे । यथा---

ततो दक्षिणासंकल्पः-ॐ अद्यकृतैतत्तृणतारेण मातृपूजन प्रतिष्ठा सांगता सिद्ध्यर्थमिमां दक्षिणाममुकगोत्रायामुकशर्मणे ब्राह्मणायाहं सम्प्रददे ।

तदनन्तर आभ्युदयिक-श्राद्ध कर पश्चात् सिलपोहन करे। यथा---

ततः शिलापेषणम्। ततो दृषदुपले निधाय, ततश्चतुःकोणे पञ्च-पञ्च शष्कुलीर्निधाय, दक्षिणाभिमुखो यजमानः, उत्तराभिमुखया भार्य्यया सह पेषयन्दक्षिणक्रमेण पञ्च कृत्वः सप्तकृत्वो वा, तयोश्शिरसि पट्टवस्त्रं सौमङ्गल्ययुतं निधाय, यथादेशं कुलं वा पञ्च सप्त सुभगा अन्या अपि तत्पश्चात्पेषयेयुः। ततस्तत्पिष्टवटकं विधाय, पूजितचुह्ल्युपरिस्थापितमृत्पात्रे मंगलगानपुरःसरं वटकं मृत्पात्रे निधाय, पूजितकाष्ठं चुह्ल्यां निधायापरं मृत्तिकापात्रद्वयमानीय, एकस्मिन् देवान् अपरस्मिन् पितृन् वेदमन्त्रेण नाममन्त्रेण वा निमन्त्रयेत्। तत्र क्रमः–ॐ गणेशम्, ॐ श्रियम्, सूर्यम्, चन्द्रमसम्, भौमम्, बुधम्, गुरुम्, शुक्रम्, शनैश्चरम्, राहुम्, केतुम्, इन्द्रादिदशदिक्पालम्, गणेशादि पंचलोकपालम्, अधिदेवम्, प्रत्यधिदेवताम्, अयोध्यादिसप्तपुरीम्, नवोषलम्, नवारण्यम्, गङ्गादिसरितम्, अश्वि-

न्यादिनक्षत्रम्, मेषादिराशिम्, विष्कुम्भादियोगम्, बवादिकरणम्, पिपीलिकाम्, सर्व्ववृक्षम्, सर्व्वसागरम्, सर्व्वान्नागान्, पर्व्वतान्, सरीसृपम्, कुलदेवम्, ग्रामदेवम्, इष्टदेवम्, ये केचिद्विस्मृतास्तानपि निमन्त्रये। एतान्निमन्त्र्य पीतवस्त्रेण मुखबन्धं विधाय। द्वितीयपात्रे नामगोत्र शर्म्म वर्म्म गुप्तदासादिकं क्रमेणोच्चार्य पितॄन् निमन्त्रये *। प्रथमं मातृः—अमुकगोत्रेऽमुकप्रवरे पितामहित्वामभिमन्त्रये। एवं पितामह्योऽपि मातरं च। जीवन्मातृकश्चेत्, वृद्धप्रपितामहीम्। ॐअद्यामुकगोत्रामुकप्रवरपितामहामुकशर्म्माणं त्वामभिमन्त्रये। पितामहं पितरम्, ॐ अद्यामुकगोत्रप्रवरप्रमातामहामुकशर्म्मन्नभिमन्त्रये। ततः प्रमातामहमन्यानपि निमन्त्रयेत्। शिलासहितदेवपितृपात्रं षोडशमातृपुरः स्थापयेत्।

अपने-अपने देशाचार व अपने-अपने कुल की रीति के अनुसार सिलपोहन करे जैसा होता

* अन्वष्टका सुमध्यस्था वृद्धावादौ प्रकीर्त्तिता: । क्षयाहे केवला प्रोक्ता अन्यत्र पतिना सह ।। (अन्यदीप) आभ्युदयिके विवाहे च प्रपितामहपूर्व्वकम् । वाक्यमुच्चारयेद्धीमानन्यत्र पितृपूर्व्वकम् ।।

विo
५६

हो। बाद माड़व के नीचे से औरतें सिलपोहन की सब सामग्री उठाकर अपने इष्ट-देवता के सामने लेजाकर जैसा होता हो वैसा अवश्य करें।

इत्थं सम्प्रार्थ्य नमस्कृत्य वसोर्द्धारां कुर्य्यात्। ततः कांस्यपात्रे घृतमानीय षोडशमातुरुपरि घृतधारान् दद्यात्। अनेन मन्त्रेण—ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम्। देवस्त्वासविता पुनातु व्वसोः पवित्रेण शतधारेण सुप्वाकामधुक्ष॥ इति वसोर्द्धारां कृत्वा। तदुपरि सिन्दूराक्षतान् दद्यात्। अनेन मन्त्रेण। पत्न्या दक्षिणकेशं हस्ते गृहीत्वा वसुधारायादत्तघृतसिन्दूराभ्यां सह कुमारस्य वा कन्यायाः मस्तके पुण्ड्रं दद्यात्। तत्र मन्त्रः—ॐ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम्। यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषम्॥ इत्थं समाप्याचार्य्याय दक्षिणां दद्यात्। ॐ अद्येत्यादिदेशकालवाक्यानन्तरं मम पुत्रस्य दुहितुर्वा विवाहाङ्गतया कृतैतत्षोडशमातृपूजनप्रतिष्ठासाङ्गतासिद्ध्यर्थं दक्षिणां हिरण्य-

मग्निदैवतन्तन्मूल्योपकल्पितं यद्द्रव्यं यथानामगोत्राय ब्राह्मणाय तुभ्यमहं सम्प्रददे। इत्थमाचार्य्यं परितोष्य, न्यूनाधिककृतकर्म्मपूरणार्थं विष्णुं स्मरेत्। ॐ यस्य स्मृत्या च नामोक्त्या तपो यज्ञक्रियादिषु। न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥ ततः पत्नीपतेः पादौ गृह्णीयात्। स च पुत्रवती शुभगा भवेत्युक्त्वा किंचिद्दातुं वाचं विसृजेत्। ग्रन्थिमोचनं कृत्वा, एवं कर्म्म समाप्याचार्य्याज्ञयाभ्युदयिकं श्राद्धं कुर्य्यादिति। सर्व्वेषु शुभकार्येषु पत्नी तिष्ठति दक्षिणे। सिन्दूरदाने शय्यायां पत्नी तिष्ठति वामतः ॥

इति मातृ-पूजापूर्वक आभ्युदयिक श्राद्धा समाप्त।

अथ वर-यात्रा।

प्रथम वर को उबटन लगाय स्नान कराकर अंजुली भरवाय अपने इष्टदेव व पितरों को नमस्कार करवाय कर आचार्य माड़व के नीचे चौक पर बैठाले, और स्वस्तिवाचन कर इस प्रकार संकल्प करे। यथा—

ॐ तत्सद्येहेत्यादि अमुकगोत्रः अमुकशर्मा मम विवाहोत्सवकर्मणि यात्रा-निर्विघ्नपरिसमाप्त्यर्थं गणेशवरुणगौरीणां पूजनमहं करिष्ये ।

फिर आचार्य का वरण करके कलश का पूजन करे । यथा—

ॐ आजिघ्रकलशम्मह्यात्वाविशन्त्विन्दवः । पुनरूर्ज्जानिवर्त्तस्वसानः सहस्र-न्धुक्क्ष्वोरुधारापयस्वती पुनर्म्माविशताद्द्रयिः ॥

इस मन्त्र से कलश का स्पर्श करे ।

ॐ वरुणस्योत्तम्भनमसिव्वरुणस्य स्कम्भसर्ज्जनीस्थोव्वरुणस्यऽऋतसदन्न्य-सिव्वरुणस्यऽऋतसदनमसि व्वरुणस्य ऋतसदनमासीद ।

इस मन्त्र से कलश में जल छोड़े ।

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातःपतिरेक आसीत् । सदाधारपृथिवींद्या-मुतेमाङ्कस्मै देवाय हविषाव्विधेम ॥

इस मन्त्र से पंचरत्नी छोड़े।

ॐ धान्यमसि धिनुहि देवान् प्राणायत्वोदानायत्वाव्यानायत्वा। दीर्घामनु-प्रसृतिमायुषेधान्देवो वः सविताहिण्यपाणिः प्रतिगृह्णात्वच्छिद्रेण पाणिना चक्षुषेत्वा महीनां पयोसि॥

इस मन्त्र से कलश में धान्य धरे।

ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्य्योज्योतिर्ज्योतिः सूर्य्यः स्वाहा। अग्निर्वर्च्चो ज्योतिर्वर्च्चस्स्वाहा सूर्य्योवर्च्चोज्योतिर्वर्च्चस्स्वाहा। ज्योतिः सूर्य्यः सूर्य्यो ज्योतिः स्वाहा॥

इस मन्त्र से दीपक धरे। और हाथ में अक्षतों को लेकर देवतों का आवाहन करे। यथा—

ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनो त्वरिष्टम्। यज्ञꣳ समिमन्दधातु॥ विश्वेदेवा स इहमादयन्तामों ३ प्रतिष्ठ॥

इस मन्त्र से आवाहन व प्रतिष्ठा कर अर्घ्य, आचमन, पाद्य, गन्ध, अक्षत, पुष्प, धूप, दीप और नैवेद्यादि से गणेश का पूजन करे। यथा–

ॐ गणानान्त्वा गणपतिं्ँहवामहे प्रियाणान्त्वा प्रियपतिं्ँहवा महे निधीनान्त्वा निधिपतिं्ँहवामहे वसो मम। आहमजानिगर्भधमात्त्वमजासि गर्भधम् ॥

इस मंत्र से पूजन कर पश्चात् वरुण का पूजन करे। यथा–

ॐ इमम्मे वरुणश्रुधी हवमद्या च मृडय। त्वामवस्युराचके ॥

इस मन्त्र से वरुण का पूजन कर पश्चात् गौरी देवीजी का पूजन करे। यथा–

ॐ श्रीश्चते लक्ष्मीश्च पत्न्या वहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुम्मइषाण सर्वंलोकं मऽइषाण ॥

इस मंत्र से गौरी का पूजन करके, पश्चात् वर के वस्त्र, भूषण मँगाय प्रतिष्ठित कर कलश व गणेश को छुवाय पगड़ी शिर में बाँधे तिसका यह मंत्र पढ़े। यथा–

ॐ युवासुवासा परिवीत आगात्स उश्रेयान्भवति जायमानः तं धीरासः कवय-उन्नयंति स्वाध्यो मनसा देवयंत।

फिर धोती पहिरावे तिसका मंत्र। यथा–

ॐ परिधास्यै यशोधास्यै दीर्घायत्वायजरदृष्टिरश्मिशतं च जीवामि शरदः पुरी-चीरायस्योषमभिसंव्ययिष्ये।

तदनन्तर माथे में केशरादि से तिलक दे तिसका मंत्र यह पढ़े। यथा–

ॐ सुचक्षा अहमक्षिभ्यां भूयासꣳ सुवर्चा मुखेन सुश्रुत्कर्णाभ्यां भूयासम्।

इस मंत्र से बहिन व भावज माथे में खौर लगावे और जामा व पटुका आदि पहिरावे यह मंत्र पढ़े। यथा–

ॐ यशसा माद्यावा पृथिवी यशसेन्द्रा बृहस्पती यशोभगं च मा विद्य मा विद्यसे मा प्रपद्यताम्॥

नेग दरजी का। और वस्त्र को मौन से धारण करे बाद कान में कुण्डलादि धारण करते समय यह मंत्र पढ़े। यथा–

ॐ अलंकरणमसि भूयोलंकरणं मे भूयाः।

इस प्रकार वामभाग में धारण कराय फिर और सब भूषण पहिनावे–**नेग सुनार का।** इसके पश्चात् नाखुर करना चाहिये–**नेग नाउन का।** इसके अनन्तर आँख में काजर लगावे–**नेग भौजाई व अपने देशाचार के अनुकूल।** तिसका मंत्र–

ॐ वृत्रस्याक्षिकनीनकश्चक्षुर्वा असि चक्षुर्मे देहि।

इसके अनन्तर क्षत्र धारण करे, तिसका मंत्र। यथा–

ॐ बृहस्पतेः छदिरसि पाप्मानो मानन्तर्धेहि तेजसो मान्तर्धेहि।

नेग बारिन का। इस मंत्र से छतुरी धारण कर फिर उपानह धारण करे, यथा–

ॐ प्रतिष्ठेस्थोपि विश्वतो मायातम्।

इस मंत्र से जूता धारण करे– **नेग चर्मकार का।** मौनता से जामा में कंकण बांधे—**नेग**

लोहार का। फिर मौर धारण करे——**नेग माली का**। तदनन्तर लोकाचार कर्म। चढ़ायेवाली चूनर को वर के शिर के ऊपर चार स्त्री (व अपने देशाचार के अनुकूल) कोने पकड़ कर सूत या कलावा से सात फेरा डोरा का घुमावें और कोई अपने मान्य पुरुष धान हाथों से एक बार मलँ और वही चावल लेकर पोटली बांध कर दाहिने हाथ में डोरा से बांधे——**नेग मान्य का**। इसी समय में बहिन भाई के राई नोन उतारे——**नेग बहिन का**। बाद जल, अक्षत ले संकल्प करे, यथा——

तोदकं त्रिः प्रोक्षणीपात्रे निधायानामिकांगुष्ठाभ्याम्, उत्तराग्रे पवित्रे गृहीत्वा त्रिरुत्पवनम्। ततः प्रोक्षणीपात्रं वामहस्ते कृत्वाऽनामिकांगुष्ठाभ्यामुत्तराग्रे पवित्रे गृहीत्वा त्रिरुद्दिङ्गनम्। प्रणीतोदकेन प्रोक्षणीप्रोक्षणम्। प्रोक्षणीजलेन यथासादित-वस्तुसेचनम्। ततोऽग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निधाय, आज्यस्थाल्यामाज्यं निरूप्य, ततोऽधिश्रयणम्, ज्वलत्तृणादिना हविर्वेष्टयित्वा, प्रदक्षिण-क्रमेण वह्नौ तत्प्रक्षेपः, पर्यग्निकरणम्, ततः स्रुवप्रतपनं कृत्वा, संमार्जनकुशानामग्रैरन्तरतो मूलैर्बाह्यतः स्रुवसंमार्जनम्, प्रणीतादेकेनाभ्युक्ष्य, पुनः प्रतप्याग्नेर्दक्षिणतः कुशोपरि निदध्यात्। तत आज्यस्याग्नेरवतारणम्। तत आज्ये प्रोक्षणीवदुत्पव-नम्। अवेक्ष्य सत्यपद्रव्ये तन्निरसनम्। पुनः प्रोक्षण्युत्पवनं कृत्वा। तत उत्थाय, उपयमनकुशान् वामहस्ते कृत्वोत्तिष्ठन्प्रजापतिं मनसा ध्यात्वा, तूष्णीमग्नौ घृताक्तास्तिस्रः समिधः क्षिपेत्। तत उपविश्य, सपवित्रप्रोक्षण्युदकेन प्रदक्षिण-

क्रमेणाग्निं पर्युक्ष्य, प्रणीतापात्रे पवित्रे निधाय, पातितदक्षिणजानुः, कुशेन ब्राह्मणान्वारब्धस्समिद्धतमेऽग्नौ स्रुवेणाज्याहुतीर्जुहोति । तत्राघारादारभ्य द्वादशाहुतिषु तत्तदाहुत्यनन्तरं स्रुवावस्थितहुतशेषस्य घृतस्य प्रोक्षणीपात्रे प्रक्षेपः । ॐ प्रजापतये स्वाहा, इदं प्रजापतये, इति मनसा । ॐ इन्द्राय स्वाहा, इदमिन्द्राय, इत्याघारौ । ॐ अग्नये स्वाहा, इदमग्नये । ॐ सोमाय स्वाहा, इदं सोमाय, इत्याज्यभागौ ।

इस प्रकार पञ्च भूसंस्कार करके आघार व आज्यभाग की आहुति देकर कलश की प्रतिष्ठा व पूजन करे । अब होमार्थ संकल्प करे, यथा–

ॐ अद्येहेत्यादि इदं सम्पादितद्रव्यं या या यक्ष्यमाणदेवतास्ताभ्यस्ताभ्य उत्सृष्टं न मम ।

ऐसा संकलपकर हवनीय द्रव्य से हवन करे । और भूआदि प्रायश्चित की आठ आहुति दे । यथा–

ॐ त्रिव्याहृतीनां प्रजापतिऋषिरग्निवायुसूर्यो देवता गायत्र्युष्णिगनुष्टुप्छन्दांꣳसि व्याहृतीहोमे विनियोगः। ॐ भूः स्वाहा, इदमग्नये। ॐ भुवः स्वाहा, इदं वायवे। ॐ स्वः स्वाहा, इदं सूर्याय। एता महाव्याहृतयः।

अथ पंचवारुणीहोमः। यथा—

ॐ त्वन्नो अग्ने इति वामदेवऋषिरग्निवरुणौ देवते त्रिष्टुप्छन्दो होमे विनियोगः। ॐ त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडो अवयासिसीष्ठाः॥ यजिष्ठोवह्नितमः शोशुचानोविश्वाद्वेषाꣳसि प्रमुमुग्ध्यस्मत् स्वाहा॥ इदमग्नीवरुणाभ्याम्॥ ॐ सत्वन्न इत्यस्य वामदेवऋषिस्त्रिष्टुप्छन्दः अग्निर्देवता। वरुणयागे याज्यमंत्रपठने विनियोगः। ॐ सत्वन्नोअग्ने वमो भवोतीनेदिष्ठो अस्या उषसोव्युष्टौ॥ अवयक्ष्वनोवरुणꣳ रराणोवीहि मृडीकꣳ सुहवो न एधि स्वाहा॥

इदमग्नीवरुणाभ्याम् ॥ ॐ अयाश्चाग्ने इति वामदेवऋषिरग्निर्देवतात्रिष्टुप्छन्दः
सर्वप्रायश्चित्तहोमे विनियोगः । ॐ अयाश्चाग्नेऽस्यनभिशस्तिपाश्च सत्य-
मित्वमया असि । अयानो यज्ञं वहास्ययानो धेहि भेषजꣳ स्वाहा ॥ इदमग्नये॥
ॐ येते शतमिति वामदेवऋषिर्वरुणः सविताविष्णुविश्वे मुंचंतु मरुतः स्वर्कादेवता
त्रिष्टुप्छन्दः सर्वप्रायश्चित्तहोमे विनियोगः । ॐ येते शतं वरुणये सहस्रं यज्ञियाः
पाशावितता महान्तः॥तेभिर्नो अद्यसवितोतविष्णुर्विश्वेमुञ्चंतु मरुतःस्वर्काः स्वाहा ॥
इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः। ॐ उदुत्तममिति
शुनःशेफऋषिर्वरुणो देवता त्रिष्टुप्छन्दः पाशान्मोके विनियोगः । ॐ उदुत्तमं
वरुणपाशमस्मदवाधमं विमध्यमꣳ श्रथाय ॥ अथाव्वयमादित्यव्रते तवानागसो-
अदितये स्याम स्वाहा ॥ इदं वरुणायादित्यादितये च न मम॥ एताः प्रायश्चित्त

संज्ञकाः। ❀ततोऽन्वारब्धं विना॥ॐप्रजापतये स्वाहा, इदं प्रजापतये ०ॐअग्नये स्विष्टकृते स्वाहा, इदमग्नेये स्विष्टकृते । उदकोपस्पर्शनम् ।

यथाबाणप्रहाराणां कवचं भवति वारणम् तद्वद्दैवोपघातानां शांतिर्भवति वारणम् ॥ शांतिरस्तु पुष्टिरस्तु वृद्धिरस्तु यत्पापं रोगं कष्टं तत्प्रणयस्तु ॥

इस मन्त्र से वर कन्या के शिर पर कुशों से जल छिड़के ।

अथ राष्ट्रभृद्धोमो यथा--ॐ ऋताषाड् इति द्वादशमन्त्राणां देवा ऋषयो गन्धर्व्वाप्सरसो देवतास्त्रिष्टुप्छन्दो होमे विनियोगः । ॐ ऋताषाडितिप्रजापति ऋषिः औषधयोप्सरसो मुदो देवता यजुर्होमे विनियोगः । ऋताषाड्ऋतधामाग्नि-

---

❀समस्त आहुतियों के अन्त में त्याग वाक्य स्वयं वर को ही उच्चारण करना चाहिये । कारण कि इस होम में यजमान वर ही है । इन चौदह आहुतियों के पीछे ब्रह्मा के अन्वारब्ध किये बिना ही आहुतियाँ प्रदान करनी उचित है । यह जिस-जिस स्थान में "उदकोपस्पर्शन" लिखा है वहां वहां दाहिने हाथ से प्रणीता के जल का स्पर्श करना चाहिये ।

गन्धर्वः सनइदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् ॥ इदमृतासाहे ऋतधाम्नेऽग्नये गन्धर्वाय० ॥ १ ॥ ॐ ऋताषाड्ऋतधामाग्निर्गन्धर्व्वस्तस्यौषधयोप्सरसो मुदो नाम ताभ्यः स्वाहा ॥ इदमोषधीभ्योऽप्सरोभ्योमुद्भ्यो० ॥ २ ॥ ॐ स ꣳ हित इति प्रजापतिर्ऋषिः विश्वसामा सूर्यो गन्धर्वो देवता यजुर्होमे विनियोगः ॥ ॐ स ꣳहितो विश्वसामा सूर्यो गन्धर्वः, सन इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट्। इदं स ꣳ हिताय विश्वसाम्ने सूर्याय गन्धर्वाय० ॥ ३ ॥ सꣳहित इति प्रजापतिर्ऋषिः मरीचयोऽप्सरसोआयुवो देवता यजुर्होमे विनियोगः। ॐ सꣳ हितो विश्वसामा सूर्यो गन्धर्व्वस्तस्य मरीचयोऽप्सरसआयुवोनामताभ्यः स्वाहा। इदं मरीचिभ्यो-ऽप्सरोभ्यआयुभ्यो न मम ॥ ४ ॥ ॐ स ꣳ हितो विश्वसामासूर्य्योगन्धर्व्वस्तस्य मरीच्रयोप्सरसआयुवोनाम ॥ सनऽइदम्ब्रह्मक्षत्रम्पातु तस्मै स्वाहा व्वाट् ताभ्यः स्वाहा ॥ ॐ सुषुम्ण इति प्रजापतिर्ऋषिः सुषुम्णसूर्य्यरस्मिश्चन्द्रमागन्धर्वो देवता

यजुर्होमे विनियोगः ॥ ॐ सुषुम्णः सूर्यरश्मिश्चन्द्रमागन्धर्वः सन इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् । इदं सुषुम्णाय सूर्यरश्मये चन्द्रमसे गन्धर्वाय० ॥ ५ ॥ इदꣳ सुषुम्णः सूर्यरश्मये चन्द्रमसे गन्धर्व्वाय न मम ॥ सुषुम्ण इति प्रजापतिऋषिर्नक्षत्राण्यप्सरसोभेकुरयो देवता यजुर्होमे विनियोगः । ॐ सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नामताभ्यः स्वाहा । इदं नक्षत्रेभ्योऽप्सरोभ्योभेकुरीभ्यो न मम ॥ ६ ॥ सुषुम्णꣳ सूर्य्यरश्मिश्चन्द्रमा गन्धर्व्वस्तस्य नक्षत्राण्यप्सरसोभेकुरयो नाम ॥ सनऽइदम्ब्रह्मक्षत्रम्पातु तस्मै स्वाहा वाट् ताभ्याः स्वाहा ॥

ॐ इषिर इति प्रजापतिऋषिः इषिरविश्वव्यचावातो गन्धर्वो देवता त्रिष्टुप्छन्दो यजुर्होमे विनियोगः । ॐ इषिरोविश्वव्यचावातो गन्धर्वः सन इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् ॥ इदमिषिराय विश्वव्यचसेवाताय गन्धर्वाय न मम ॥ ७ ॥

इ॒षिरइति प्रजापतिऋषिः आपोऽप्सरसो ऊर्जो देवता यजुर्होमे विनियोगः। ॐ इषि-
रोविश्वव्यचावातो गन्धर्वस्तस्यापोऽप्सरस ऊर्जोनामताभ्यः स्वाहा॥ इदमद्भ्यो-
प्सरोभ्यो ऊर्ज्जेभ्यो न मम ॥ ८॥ इषिरोविश्वचावातो गन्धर्वस्तस्यापो अप्सरस-
ऊर्ज्जोनाम॥ सनऽइदं ब्रह्मक्षत्रम्पातु तस्मै स्वाहा वाट्ताभ्यः स्वाहा॥ ॐ भुज्युरिति
प्रजापतिऋषिर्भुज्युः सुपर्णोयज्ञो गन्धर्वो देवता त्रिष्टुप्छन्दः यजुर्होमे विनियोगः।
ॐ भुज्युः सुपर्णो यज्ञोगन्धर्वः सन इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट्॥ इदं
भुज्यवे सुपर्णाय यज्ञाय गन्धर्वाय न मम॥ ९॥ भुज्युरिति प्रजापतिऋषिर्दक्षिणा-
प्सरसस्तावा देवता यजुर्होमे विनियोगः। ॐ भुज्युः सुपर्णो यज्ञो गन्धर्वस्तस्य
दक्षिणाप्सरसस्तावानामताभ्यः स्वाहा। इदं दक्षिणाभ्योऽप्सराभ्योस्तावाभ्यो न
मम॥ १०॥ ॐ भुज्युः सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणाऽप्सरसस्तावानाम॥
सन इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा॥ ॐ प्रजापतिरिति

प्रजापतिऋषिर्विश्वकर्मा मनो गन्धर्वो देवता त्रिष्टुप्छन्दः यजुर्होमे विनियोगः।
ॐ प्रजापतिर्विश्वकर्मामनो गन्धर्वः सन इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट्।
इदं प्रजापतये विश्वकर्मणे मनो गन्धर्वाय न मम॥ ११ ॥ प्रजापतिरिति प्रजापतिऋषिः ऋक्सामान्यप्सरसो एष्टयो देवता त्रिष्टुप्छन्दः यजुर्होमे विनियोगः।
ॐ प्रजापतिर्विश्वकर्मामनो गन्धर्वस्तस्य ऋक्सामान्यप्सरसो एष्टयो नाम ताभ्यः स्वाहा। इदमृक्सामेभ्योऽप्सरोभ्य एष्टिभ्यो न मम॥ १२ ॥ प्रजापतिर्विश्वकर्मा मनोगन्धर्वस्तस्यऽऋक्सामान्यप्सरसऽएष्टयोनाम। सन इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा॥ इति राष्ट्रभृतः॥

इस प्रकार बारह मंत्रों से राष्ट्रभृत् होम को करके, तदनन्तर तेरह मंत्रों से जया होम करे, और जल का स्पर्श करे। मन्त्रः—यथा—

आपः शिवाः शिवतमाः शांताः शांततमास्तास्ते कृण्वन्तु भेषजम्।

अथ जया होमः—ॐ चित्तं चेति परमेष्ठीऋषिश्चित्तं देवता त्रिष्टुप्छन्दः यजुर्होमे विनियोगः। ॐ चित्तं च स्वाहा, इदं चित्ताय ॥ १ ॥ ॐ चित्तिश्चेति परमेष्ठी-ऋषिश्चित्तिर्देवता यजुर्होमे विनियोगः। ॐ चित्तिश्च स्वाहा, इदं चित्त्यै ॥ २ ॥ ॐ आकूतं चेति परमेष्ठीऋषि आकूतं देवता यजुर्होमे विनियोगः। ॐ आकूतं च स्वाहा, इदमाकूताय ॥ ३ ॥ ॐ आकूतिश्चेति परमेष्ठीऋषिराकूतिर्देवता यजुर्होमे विनियोगः। ॐ आकूतिश्च स्वाहा, इदमाकूत्यै ॥ ४ ॥ ॐ विज्ञातं चेति परमेष्ठी-ऋषिर्विज्ञातं देवता यजुर्होमे विनियोगः। ॐ विज्ञातं स्वाहा, इदं विज्ञाताय ॥ ५ ॥ ॐ विज्ञातिश्चेति परमेष्ठीऋषिर्विज्ञातिर्देवता यजुर्होमे विनियोगः। ॐ विज्ञातिश्च स्वाहा, इदं विज्ञात्यै ॥ ६ ॥ ॐ मनश्चेति परमेष्ठीऋषिर्मनो देवता यजुर्होमे विनि-योगः। ॐ मनश्च स्वाहा, इदं मनसे ॥ ७ ॥ ॐ शक्करीश्चेति परमेष्ठीऋषिः शक्करी देवता यजुर्होमे विनियोगः। ॐ शक्करीश्च स्वाहा, इवं शक्करी ॥ ८ ॥

ॐ दर्शश्चेति परमेष्ठीऋषिः दर्शो देवता यजुर्होमे विनियोगः। ॐ दर्शश्च स्वाहा, इदं दर्शाय ॥ ९ ॥ ॐ पौर्णमासं चेति परमेष्ठीऋषि पौर्णमासं देवता यजुर्होमे विनियोगः। ॐ पौर्णमासं च स्वाहा, इदं पौर्णमासाय ॥ १० ॥ ॐ बृहश्चेति परमेष्ठीऋषिः बृहद्देवता यजुर्होमे विनियोगः। ॐ बृहश्च स्वाहा, इदं बृहते ॥ ११ ॥ ॐ रथंतरं चेति परमेष्ठीऋषीरथंतरं देवता यजुर्होमे विनियोगः। ॐ रथंतरं च स्वाहा, इदं रथंतराय ॥ १२ ॥ ॐ प्रजापतिरिति प्रजापतिऋषिः प्रजापतिर्जयानिन्द्रो देवता त्रिष्टुप्छन्दो होमे विनियोगः। ॐ प्रजापतिर्जयानिन्द्राय विष्णवे प्रयच्छदुग्रः पृतनाज्जयेषु तस्मै विशः समनमंतः सर्वाः स उग्रः स इहव्यो वभूव स्वाहा ॥ इदं प्रजापतिर्जयायनिन्द्राय ॥ १३ ॥ उदकस्पर्शनम् ॥

अर्थात् जल का स्पर्श करे। मंत्रः, यथा—

आपः शिवाः शिवतमाः शांताः शांततमास्तास्ते कृण्वंतु भेषजम् ॥ इति जया होमः।

इसके पश्चात्, अभ्यातान होम को अठारह मन्त्रों से करे ।

अथाभ्यातानहोमः– ॐ अग्निर्भूतानामिति प्रजापतिऋर्षि अग्निर्भूतानामधिपतिर्देवता त्रिष्टुप्छन्दः होमे विनियोगः । ॐ अग्निर्भूतानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳪ स्वाहा ॥ १ ॥ इदमग्नये भूतानामधिपतये न मम ॥

ॐ इन्द्रो ज्येष्ठानामिति प्रजापतिऋर्षि इन्द्रो ज्येष्ठानामधिपतिर्देवता त्रिष्टुप्छन्दो होमे विनियोगः। ॐ इन्द्रो ज्येष्ठानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्याᳪ स्वाहा ॥ २ ॥ इदमिन्द्राय ज्येष्ठानामधिपतये० ॥

अब यहां पर मामू के पट का अन्तर कर एक आहुति यमराज की देना । यथा–

ॐ यमः पृथिव्यानामिति प्रजापतिऋर्षिर्यमः पृथिव्यानामधिपतिर्देवता त्रिष्टुप्छन्दो होमे विनियोगः । ॐ यमः पृथिव्याअधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन्

क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳬ स्वाहा ॥ ३ ॥ इदं यमाय पृथिव्या अधिपतये० ॥❀

अत्र प्रणीतोदकस्पर्शः– "आपः शिवाः शिवतमाः शांताः शांततमास्तास्ते कृण्वन्तु भेषजम् ॥"

ॐ वायुरन्तरिक्षस्येति प्रजापतिर्ऋषिर्वायुरन्तरिक्षस्याधिपतिर्देवता त्रिष्टुप्छन्दो होमे विनियोगः। ॐ वायुरन्तरिक्षस्याधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳬ स्वाहा ॥ ४ ॥ इदं वायवेऽन्तरिक्षस्याधिपतये० ॥

ॐ सूर्य्य इति प्रजापतिर्ऋषिः सूर्य्यो दिवोऽधिपतिर्देवता त्रिष्टुप्छन्दो होमे विनियोगः। ॐ सूर्यो दिवोधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्य-

❀ एवं समावत्वस्मिन्नित्यादि स्वाहान्तस्य, सर्वस्मिन्वक्ष्यमाणमंत्रेष्वेवमेवानुषङ्गः ॥

स्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳪ स्वाहा ॥ ५ ॥ इदं सूर्याय दिवोधिपतये० ॥

ॐ चन्द्रमा इति प्रजापतिर्ऋषिश्चन्द्रमा नक्षत्राणामधिपतिर्देवतात्रिष्टुप्छन्दो होमे विनियोगः। ॐ चन्द्रमा नक्षत्राणामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳪ स्वाहा ॥ ६ ॥ इदं चन्द्रमसे नक्षत्राणामधिपतये० ॥

ॐ बृहस्पतिरिति प्रजापतिर्ऋषिर्बृहस्पतिर्ब्रह्मणोऽधिपतिर्देवता त्रिष्टुप्छन्दो होमे विनियोगः। ॐ बृहस्पतिर्ब्रह्मणोधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रे-स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्म्मण्यस्यां देवहूत्याᳪ स्वाहा ॥ ७ ॥ इदं बृहस्पतये ब्रह्मणोधिपतये० ॥

ॐ मित्रः सत्यानामिति प्रजापतिर्ऋषिर्मित्रः सत्यानामधिपतिर्देवता त्रिष्टु-

प्छन्दः होमे विनियोगः। ॐ मित्रः सत्यानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳬं स्वाहा ॥ ८ ॥ इदं मित्राय सत्यानामधिपतये० ॥

यहां पर बरौनापूजा और नेग माली का–

ॐ वरुणोपामिति प्रजापतिऋर्षिः वरुणोपामधिपतिर्देवता त्रिष्टुप्छन्दो होमे विनियोगः। ॐ वरुणोपामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यांᳬ स्वाहा ॥ ९ ॥ इदं वरुणायापामधिपतये० ॥

यहां पर समुद्र का जल गंगापुत्र को देना उचित है, गंगापुत्र का नेग।

ॐ समुद्रस्रोत्यानामधिपतिर्देवता त्रिष्टुप्छन्दो होमे विनियोगः। ॐ समुद्रः स्रोत्यानामधिपतिः स भावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायाम-

स्मिन् कर्म्मण्यस्यां देवहूत्याᳫं स्वाहा ॥१०॥ इदं समुद्राय स्रोत्यानामधिपतये०॥

ॐ अन्नᳫंसाम्राज्यानामिति प्रजापतिर्ऋषिरन्नᳫं साम्राज्यानामधिपतिर्देवता त्रिष्टुप्छन्दो होमे विनियोगः। ॐ अन्नᳫं साम्राज्यानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳫं स्वाहा ॥ ११ ॥ इदमन्नाय साम्राज्यानामधिपतये० ॥

ॐ सोम ओषधीनामिति प्रजापतिर्ऋषिः सोम ओषधीनामधिपतिर्देवता त्रिष्टुप्छन्दः होमे विनियोगः। ॐ सोम ओषधीनामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳫं स्वाहा ॥१२॥ इदं सोमायोषधीनामधिपतये० ॥

ॐ सविताप्रसवानामिति प्रजापतिर्ऋषिः सविताप्रसवानामधिपतिर्देवता त्रिष्टुप्छन्दो होमे विनियोगः। ॐ सविताप्रसवानामधिपतिः स मावत्वस्मिन् ब्रह्मण्य-

स्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳫ स्वाहा ॥१३॥
इदᳫसवित्रे प्रसवानामधिपतये० ॥

यहां सिंधौरा की पूजा रुद्र की दक्षिणा, गोसांई का नेग ।

ॐ रुद्रः पशूनामिति प्रजापतिऋषीरुद्रः पशूनामधिपतिर्देवता त्रिष्टुप्छन्दो होमे विनियोगः । ॐ रुद्रः पशूनामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳫ स्वाहा ॥ १४ ॥ इदं रुद्राय पशूनामधिपतये० ॥

अत्र प्रणीतोदकस्पर्शः—"ॐ आपः शिवाः शिवतमाः शांताः शांततमास्तास्ते कृण्वंतु भेषजम् ॥"

ॐत्वष्टारूपाणामिति प्रजापतिऋषिस्त्वष्टारूपाणामधिपतिर्देवता त्रिष्टुप्छन्दो होमे विनियोगः । ॐ त्वष्टारूपाणामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन्

क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳫं स्वाहा ॥ १५ ॥ इदं त्वष्ट्रेरूपाणामधिपतये० ॥

विष्णु पर्वत से लकड़ी लाने का नेग, लकड़ी देनेवाले का ।

ॐ विष्णुः पर्वतानामिति प्रजापतिऋषिर्विष्णुः पर्वतानामधिपतिर्देवता त्रिष्टुप्छन्दो होमे विनियोगः । ॐ विष्णुः पर्वतानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳫं स्वाहा ॥ १६ ॥ इदं विष्णवे पर्वतानामधिपतये० ॥

ॐ मरुतोगणानामिति प्रजापतिऋषिर्मरुतो गणानामधिपतिर्देवता त्रिष्टुप्छन्दो होमे विनियोगः । ॐ मरुतो गणानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳫं स्वाहा ॥१७॥ इदं मरुद्भ्यो गणानामधिपतिभ्यो० ॥

यहाँ पर पितरन का करवा खोलाय देवे ।

ॐ पितर इति प्रजापतिर्ऋषिः पितरः पितामहाः परेऽवरे ततास्ततामहा देवता त्रिष्टुप्छन्दो होमे विनियोगः । ॐ पितरः पितामहाः परेऽवरे ततास्ततामहा इह मावन्त्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳬ स्वाहा ॥ १८ ॥ इदं पितृभ्यः पितामहेभ्यः परेभ्योऽवरेभ्यस्ततेभ्यस्ततामहेभ्यो न मम ॥

अत्र प्रणीतोदकोपस्पर्शनम् । "आपः शिवाः शिवतमाः शांताः शांततमास्तास्ते कृण्वन्तु भेषजम् ।" अथवा "यथा बाणप्रहाराणामिति ।"

इस मन्त्र से । ये अष्टादश* मन्त्र अभ्यातानसंज्ञक हैं ।

इत्याभ्याताननामकम् ।

अब अग्निरित्यादि चार मन्त्रों की आहुति दे ।

* एतेऽष्टादश मन्त्रा अभ्यातानसंज्ञकाः ।

ॐ अग्निरैतु प्रजापतिर्ऋषिः, अग्निर्देवता त्रिष्टुप्छन्दो होमे विनियोगः ।
ॐ अग्निरैतु प्रथमो देवतानाᳬसोऽस्यै प्रजां मुञ्चन्तु मृत्युपाशात्, तदयᳬ राजा वरुणोऽनुमन्यताम् यथेयᳬ स्त्रीपौत्रमघन्नरोऽदात्स्वाहा, इदमग्नये, न मम ॥ १ ॥
ॐ इमामग्निरिति प्रजापतिर्ऋषिः, अग्निर्देवता त्रिष्टुप्छन्दो होमे विनियोगः ।
ॐ इमामग्निस्त्रायतां गार्हस्पत्यः प्रजामस्यै नयतु दीर्घमायुः अशून्योपस्था जीवता-मस्तु मातापौत्रमानन्दमभिविबुध्यतामियᳬ स्वाहा ॥ इदमग्नये, न मम ॥ २ ॥
ॐ स्वस्तिन इति प्रजापतिर्ऋषिः, अग्निर्देवता त्रिष्टुप्छन्दो होमे विनियोगः ।
ॐ स्वस्तिनोऽग्ने दिवाऽऽपृथिव्या विश्वानिधेह्ययथाय । यत्र यदस्यां महिदिवि-जातं प्रशस्तं तदस्मा सुद्रविणं धेहि चित्रᳬ स्वाहा ॥ इदमग्नये, न मम ॥ ३ ॥
ॐ सुगन्निति प्रजापतिर्ऋषिर्वैवस्वतो देवता त्रिष्टुप्छन्दो होमे विनियोगः ।
ॐ सुगन्नुपन्था प्रदिशन्न एहि ज्योतिष्मधे ह्यजरन्नआयुः । अपैतु मृत्युरमृतं म

आगाद्वैवस्वतो नो अभयं कृणोतु स्वाहा ॥ इदं वैवस्वताय, न मम ॥ ४ ॥

ये आहुतियाँ भी दक्षिण दिशा में अन्य पात्र में छोड़ देना। और प्रणीता† के जल का स्पर्शन करना "आप: शिवा: शिवतमा: शान्ता: शान्ततमास्तास्ते कृण्वन्तु भेषजम् ॥" तदनन्तर मामा के वस्त्र से अन्तर्पट‡ कराय आहुति देवे।

ॐ परं मृत्युरिति संकशुकऋषिः, मृत्युर्देवता त्रिष्टुप्छन्दो होमे विनियोगः। ॐ परं मृत्यो अनुपरेहि पन्थां यस्तेऽन्य इतरो देवयानात्। चक्षुष्मते शृण्वते ते ब्रवीमिमानः प्रजाꣳ रीरिषोमोतवीरान् स्वाहा ॥ इदं मृत्यवे, न मम ॥ अत्र प्रणीतोदकस्पर्शनम् ॥ एके+ संस्रवप्राशनान्ते जुहुयात् ॥

यहाँ पर भी प्रणीता के जल का स्पर्शन न करे। "आप: शिवेति" इस मंत्र से।

ततो वधूमग्रतः कृत्वा, वरो वधूश्च द्वावपि प्राङ्मुखौ स्थितौ भवतः। ततो

† अत्र प्रणीतोदकस्पर्शनम् ॥ ‡ततोऽन्तरपटम्। +एवमूचुरिति शेषः।

वराञ्जलिपुटोपरिसंलग्नवध्वञ्जलिस्थघृताभिधारितवधूभ्रातृदत्तशमीपालाशमिश्रैर्ला-जैर्वधूकर्तृको मंत्रपाठपूर्वको होमः ।*

तदनन्तर लाजाहुति से हवन करे, प्रथम वधू को वर के आगे स्थित करे, और वधू के पीछे पूर्व-मुख स्थित हो, तत्पश्चात् कुमारी का भ्राता, शमी-पालाश-मिश्रित लाई से कुमारी की अंजली पूर्ण करे, और अर्यमणादि तीन मंत्रों को पढ़कर, अग्नि में हवन करे । तत्र मंत्रः। यथा--

ॐ अर्यमणमित्याथर्वणऋषिरनुष्टुप्छन्दोऽग्निर्देवता लाजाहोमे विनियोगः ।

ॐ अर्यमणं देवं कन्या अग्निमयक्षत स नो अर्यमा देवः प्रेतो मुञ्चन्तु मापतेः स्वाहा । इदमर्यमणे, न मम ॥ १ ॥

---

*ततो वधूमग्रतः कृत्वा, वरो वधूश्च द्वावपि प्राङ् मुखौ स्थितौ भवतः । ततो वराञ्जलिपुटोपरिसंलग्न-वध्वञ्जलिस्थान् घृताभिधारितान्कुमारीभ्राता शमीपालाशमिश्राँल्लाजान् सूर्पकृतान्स्वेनाञ्जलिना गृहीत्वा कुमार्यञ्जलावावपति ॥ ताँल्लाजान् प्राङ् मुखी तिष्ठन्ती कुमारी, सव्यहस्तसहितेन दक्षिणहस्तेनाञ्जलिना जुहोति ॥

इस मंत्र द्वारा लाई के तृतीयांश से हवन करे ।

ॐ इयं नार्युपब्रूत इत्याथर्वणऋषिः, अग्निर्देवता त्रिष्टुप्छन्दो लाजाहोमे विनियोगः ॥ ॐ इयं नार्युपब्रूते लाजानावपन्तिका। आयुष्मानस्तु मे पतिरेधन्तां ज्ञातयो मम स्वाहा ॥ इदमग्नये, न मम ॥ २ ॥

इस मंत्र से अंजुली में जो लाई हो, उसके आधे से हवन करे ।

ॐ इमां लाजानावपामीत्याथर्वणऋषिः, अग्निर्देवता त्रिष्टुप्छन्दः लाजाहोमे विनियोगः । ॐ इमां लाजानावपाम्यग्नौ समृद्धिकरणं तव मम तुभ्यं च संवननं तदग्निरनुमन्यतामियꣳ स्वाहा ॥ इदमग्नये, न मम ॥ ३ ॥

इस मंत्र से अंजुली की सव लाई से हवन करे ।

ततो वरो वधूदक्षिणहस्तं सांगुष्ठं गृह्णाति ।

इसके अनन्तर वर अंगूठे-सहित वधू के दाहिने हाथ को पकड़कर निम्न-लिखित मंत्र पढ़े ।

ॐ गृभ्णामि, अस्य मंत्रस्य याज्ञवल्क्यऋषिर्लिङ्गोक्ता देवता हस्तग्रहणे विनियोगः। ॐ गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथा सः॥ भगोऽर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः॥

ॐ अमोहमिति भारद्वाजऋषिरुष्णिक्छन्दो विष्णुर्देवता हस्तग्रहणे विनियोगः। ॐ अमोहमस्मि सा त्वꣳ सा त्वमस्य मो अहम् सामोऽहस्मि ऋक्त्वं द्यौरहं पृथिवीत्वम्॥

ॐ ताव इत्यस्य मंत्रस्याथर्वणऋषिरनुष्टुप्छन्दो विष्णुर्देवता हस्तग्रहणे विनियोगः। ॐ तावेहि विवहाव है सह रेतौ दधावहै प्रजां प्रजनयावहै पुत्रान् विन्द्यावहै बहून्॥

ॐ ते सन्त्विति प्रजापतिऋषिर्यजुर्विष्णुर्देवता हस्तग्रहणे विनियोगः। ते सन्तु

जरदष्टयः संप्रियौ रोचिष्णू सुमनस्यमानौ ॥ पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतमिति मंत्रेण ॥

इस मंत्र को पढ़ कर वर हाथ को ग्रहण करे।

अथ वधूमग्नेरुत्तरतः प्राङ्मुखः पूर्वोपकल्पितं दृषदुपलं दक्षिणपादेनारोहयति वरः ॥

तदनन्तर अग्नि से उत्तर में पूर्वाभिमुख खड़ा हुआ वर, पहले से रक्खी हुई पत्थर की शिला पर अपने बाएँ हाथ से वधू का दाहिना पैर रखता हुआ, यह मंत्र पढ़े। यथा——

ॐ आरोहे ममश्मानमित्याथर्वणऋषिरनुष्टुप्छन्दो वधूर्देवता अश्मारोहणे विनियोगः। ॐ आरोहे ममश्मानमश्मेव त्वꣳ स्थिरा भव ॥ अभितिष्ठ पृतन्यतोवबाधस्व पृतनायतः ॥

इस मंत्र से आरोहण करे।

आरूढायामेव तस्यां वरो गाथां गायति--

तब उस समय वर गाथा गावे ।

ॐ सरस्वतिप्रेदेति मंत्रस्य विश्वावसुऋषिरनुष्टुप्छन्दः सरस्वती देवता गाथा-गाने विनियोगः। ॐ सरस्वतिप्रेदमवसुभगे वाजिनीवति ॥ यां त्वा विश्वस्य भूतस्य प्रजायामस्याग्रतः ॥ यस्या भूतꣳ समभवद्यस्यां विश्वमिदं जगत् ॥ तामद्य गाथां गास्यामि या स्त्रीणामुत्तमं यशः ॥ इत्यन्ताम् ॥ ततोऽग्रे वधूः पश्चाद्वरः प्रणीताब्रह्मसहितमग्निप्रदक्षिणं कुरुतः। तत्र वरपठनीयो मंत्रः। यथा—

इस प्रकार गाथा का गानकर, वधू अग्नि की परिक्रमा करे और प्रदक्षिणा के समय वर यह मंत्र पढ़े । यथा-

ॐ तुभ्यमित्यस्याथर्वणऋषिरनुष्टुप्छन्दोऽग्निस्तुद्दवेता प्रदक्षिणे विनियोगः। ॐ तुभ्यमग्नेपर्यवहत्सूर्यां वहतुना सह। पुनः पतिभ्योजायादाग्नेश्च प्रजया

सह। इति वरपठितस्यान्ते। पश्चादग्नेः स्थित्वा, लाजाहोमसांगुष्ठहस्तग्रहणाश्मारोहणगाथागानाग्निप्रदक्षिणाः पुनरपि तथैव॥ एता नवलाजाहुतयः॥ सांगुष्ठहस्तग्रहणत्रयम्॥ गाथागानत्रयम्॥ प्रदक्षिणात्रयं सम्पद्यते॥ ततस्तृतीयपरिक्रमणानन्तरं कुमार्या भ्राता सूर्पकोणप्रदेशेन सर्वाल्लाँजान्कुमार्यञ्जलावावपति॥ ताल्लाँजान्तिष्ठन्ती कुमारी जुहोति।

इस मंत्र के पढ़ने के अनंतर वर-कन्या अग्नि के पश्चिम खड़े हों। उसी तरह लाजाहोम, अंगुष्ट-सहित हस्त-ग्रहण, शिला पर आरोहण, गाथागान, अग्नि की प्रदक्षिणा इन सब कामों को उन उक्त मंत्रों से दूसरी तीसरी बार भी करे। इस तरह नव लाजाहुति, तीन अंगुष्ठ-सहित हस्त-ग्रहण, तीन गाथा गान, और तीन प्रदक्षिणा हो जाती हैं और चौथी परिक्रमा में सूप के कोने से कुमारी का भाई संपूर्ण लाई को कुमारी की अंजुली में छोड़ देवे और कुमारी उस लाई को एक दफे में हवन करे। मंत्र, यथा—

ॐ भगाय स्वाहा, इदं भगाय, न मम॥ ततः समाचारात्तूष्णीं चतुर्थं परिक्रमणं कुरुतः॥ "अग्रे वरः पश्चाद्वधूः"॥

तदनन्तर चतुर्थ परिक्रमा चुपचाप करे। आगे वर पीछे वधू हो।

ततो वर उपविश्य, ब्रह्मणान्वारब्ध आज्येन प्राजापत्यं जुहुयात्॥

तदनन्तर अपने-अपने आसनों पर बैठकर ब्रह्मा से अन्वारब्ध किये हुये इस मंत्र से प्राजापत्य आहुति देवे। मंत्र, यथा—

ॐ प्रजापतये स्वाहा इदं प्रजापतये, न मम॥ इति मनसा।

अत्र प्रोक्षणीपात्रे हुतशेषाज्यप्रक्षेपः। (एनां वधू उदीचीं सप्तपदानि प्रक्रामयति)।

अथ सप्तपदी—हवन के उपरांत भूमि में फैले हुए धानों को एकत्र कर उनकी सात ढेरी बनावे और पैसा, सुपारी, हल्दी अग्नि के उत्तर धरे, और वर उनका पूजन करे।

---

*पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम्। तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे॥

मनुस्मृति अध्याय ८ श्लो० २२७।

विवाह के मंत्र ही निश्चय से स्त्री के लक्षण हैं अर्थात उस स्त्री में भार्यात्व के संपादक हैं और उन मंत्रों की निष्ठा (सिद्धि) विद्वानों को सातवें पद में इस मंत्र (एकमिषे द्वेउर्ज्जे त्रीणि राशिपोषाय चत्वारि मायोद्भवाय पंच पशुभ्यः षड् ऋतुभ्यः सखा सप्तपदी भव) से जाननी क्योंकि सप्तपदी के अनन्तर ही भार्यात्व पैदा होता है इससे यदि सप्तपदी से पहले किसी प्रकार की कन्या के विषे वर को शंका हो जाय तो उस कन्या को त्याग दे और सप्तपदी के अनन्तर त्यागना अयोग्य है।

तत आलेपनेनोत्तरोत्तरकृतसप्तमण्डलेषु सप्तपदाक्रमणं वरः कारयति वक्ष्यमाणमंत्रैः ।

अथ संकल्पः, यथा—

ॐ अद्येहेत्यादि प्रतिगृहीतायाः स्वदारत्वसिद्ध्यर्थं सप्ताचलपूजनं करिष्ये ।

ॐ प्रतिपदसि प्रतिपदे त्वानुपदस्यनुपदे त्वासम्पदसि संपदे त्वा तेजोसि तेजसेत्वा ॥

इस मंत्र से पूजनकर वधू दक्षिण पाद को परिक्रमण करे । मंत्र, यथा—

ॐ एकमिषे इत्यादीनां मंत्राणां प्रजापतिऋर्षिर्यजुर्लिङ्गोक्ता देवता प्रक्रमणे विनियोगः ।

ॐ एकमिषे विष्णुस्त्वा नयतु, इति वरेणोक्ते । मंत्रे वधूरेकं पदमुदग्ददाति ।

ऐसा मंत्र जब वर कहे, तब वधू उत्तर मुख किये हुए दक्षिण पाद को उत्तर में दे, तदनन्तर

वाम पाद को चुपचाप धरे और कुमारी के दहिने पाद को वर अपने हाथ से प्रथम ढेरी पर स्थापित करे, तब कुमारी यह प्रतिज्ञा करे, यथा–

"लब्धस्त्वं च मया भर्ता प्राक्तनैः सुकृतैः कृतैः।
देवाग्निसन्निधौ विप्रैर्मह्यं संपादितो ह्यसि॥
सुखदुःखानि सर्वाणि भोक्ष्येऽहं च त्वया सह।
यत्र त्वं तत्र चैवाहं कन्या चैकपदेऽब्रवीत्॥"

इसी प्रकार सर्वत्र करना।

अथ द्वितीये–

ॐ द्वे ऊर्ज्जे विष्णुस्त्वा नयतु, इति द्वितीयम्।

ऐसा वर कहे, और पद-दान के अनन्तर वधू कहे। यथा–

"कुटुम्बं पालयिष्यामि त्वद्‌बुध्या जीविताvधि।
आस्तिके नास्तिके तुष्टा द्वितीये साऽऽब्रवीदिदम्॥"

अथ तृतीये–

ॐ त्रीणि रायस्पोषाय विष्णुस्त्वा नयतु, इति तृतीयम् ।

ऐसा वर कहे, और पद-दान के पश्चात् वधू कहे । यथा–

"तव भक्तिपरा नित्यं सदैव प्रियवादिनी ।
भविष्यामि पदे चैव तृतीये साऽब्रवीदिदम् ॥"

अथ चतुर्थे–

ॐ चत्वारि मापो भवाय विष्णुस्त्वा नयतु, इति चतुर्थम् ।

ऐसा वर कहे और पद-दान के अनन्तर वधू कहे । यथा–

"त्वत्सुखे सुखसंयुक्ता त्वद्दुःखे दुःखसंयुता ।
त्वद्विपत्तिं गमिष्यामि कन्यातुर्यपदेऽब्रवीत् ॥"

अथ पञ्चमे–

ॐ पञ्च पशुभ्यो विष्णुस्त्वा नयतु, इति पञ्चमम् ।

ऐसा वर कहे और पद-दान के अनन्तर वधू कहे । यथा–

"ऋतुकाले शुचिः स्नाता क्रीडिष्यामि त्वया सह ।
नाहं परनरं गच्छेत्पंचमे सा पदेऽब्रवीत् ॥"

अथ षष्ठे–

ॐ षड् ऋतुभ्यो विष्णुस्त्वा नयतु, षष्ठम् ।

ऐसा वर कहे और पद-दान के अनन्तर वधू कहे । यथा–

"इहार्थे साक्षिणो विष्णुरग्निरीशो द्विजस्तथा ।
उभयोः प्रीतिसंभूता कन्या षष्ठे पदेऽब्रवीत् ॥"

अथ सप्तमे––

ॐ सखे सप्तपदा*भव सा मामनुव्रता भव विष्णुस्त्वा नयतु, इति सप्तमम् ।

---

*अथ सप्तपदी––

वरवचनम्–"उद्याने मद्यपाने च राजद्वारे पितुर्गृहे । आज्ञां विना न गन्तव्यं वरो याचति वरांगनाम् ॥"

ऐसा वर कहे और पद-दान के अनन्तर वधू कहे । यथा–

"होमे यज्ञादिकार्येषु भवतश्च सहायिनी ।
धर्मार्थकाममोक्षाणां सप्तमे साऽब्रवीदिदम् ॥"

एवं वर एकैकं मंत्रमुच्चार्योच्चार्य सप्तपदानि दापयत्युत्तरात्तेरक्रमेण दक्षिणपादेन ॥

ततोऽग्नेः पश्चादुपविश्य वरः स्कंधे कृतादुदकुम्भादुदकमादाय वधूमूर्द्धन्य-भिषिञ्चति ॥

इस प्रकार सात पद चलकर वेदी के ऊपर शुभासन पर वर-वधू दोनों बैठें, तदनन्तर कलशस्थ जल से वर, वधू का अभिषेक आम्र-पल्लव से करे ।

ॐ आप इति मंत्रस्य प्रजापतिऋर्षिर्यजुरापो देवता त्रिष्टुप्छन्दः मूर्द्धाभिषेचने विनियोगः। ॐ आपः शिवाः शिवतमाः शांताः शांततमास्तास्ते कृण्वन्तु भेषजम् ।

इत्यनेन पुनस्तथैवोदकमादाय, आत्मानमभिषिञ्चति ।

तदनन्तर मौन अभिषेक करे ।

ॐ आपो हिष्ठा मयोभुवस्तान ऊर्जें दधातन । महेरणाय चक्षसे ॥ ॐ योवः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः॥ ॐ तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ । आपोजन यथा च नः ॥

अथैनां सूर्यमुदीक्षयति वरः ।

कन्यावचनानि– "वाजपेयाश्वमेधौ च राजसूयस्तथैव च । तुलादानविवाहादि यज्ञान्कुर्यान्मया सह ।।
वापीकूपतडागादि देवमन्दिरमेव च । माघकार्त्तिकवैशाखधर्मान्कुर्यान्मया सह ।।
मित्रामित्रौगमागम्यौ तीर्थयात्रां तथैव च । विवाहकृषिवाणिज्यं पृष्ट्वा कार्यं मया सह ।।
शतं सहस्रं लक्षं च अर्बखर्बस्तथैव च । यल्लब्धं दैवदत्तेन मम हस्ते समर्पय ।।
गोवृषौमहिषीछागोगजाश्वीष्ट्रोत्तरास्तथा । क्रयविक्रयवेलायां मां पृष्ट्वा विनिमयं कुरु ।।
अर्जुनस्य सखा कृष्णः शक्रस्य च बृहस्पतिः । चाखस्येव सखा स्वातिस्तथा त्वं मे भवप्रभो ।।

सप्तपदी-प्रक्रमण में ये प्रतिज्ञा-रूप वचनों को पढ़कर, गृहस्थाश्रम के अर्थ अपने वामांगी करे, प्रथम एक वचन वर का है और पश्चात् छः वचन कन्या के हैं ।

फिर सूर्य का दर्शन करावे ।

दिवाविवाहे—ॐ तच्चक्षुरिति मन्त्रस्य दध्यङ्ङाथर्व्वणऋषिः पुरुष्णिक्छन्दः सूर्यावेक्षणे विनियोगः । ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ॥ पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ॥ इमि मंत्रेण वधूः सूर्यं पश्यति ।

इस मंत्र से वधू सूर्य को देखे ।

अस्तमिते सूर्ये ध्रुवमुदीक्षस्वेति पतिः । प्रेषांनंतरं ध्रुवं पश्यति । तत्र पठनीयो मंत्रः ।

यदि रात्रि में विवाह हो, तो वधू वर को ध्रुवजी का दर्शन करावे ।

ॐ ध्रुव इत्यस्य परमेष्ठी ऋषिः पंक्तिश्छन्दः प्रजापतिर्देवता ईक्षणे विनियोगः । ॐ ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवै धियोष्यामयि मह्यं त्वादात् । बृहस्पतिर्मया पत्या प्रजावती संजीव शरदः शतम् ॥ इति पृष्टा सा यद्यपि न पश्येत्तथापि पश्यामीति ब्रूयात् ।

अथ वरो वध्वा दक्षिणांसस्योपरि हस्तं नीत्वा तस्या हृदयमालभते ।

तदनन्तर हृदयालंभन करे अर्थात् वर, वधू के दाहिने कन्धेपर अपना दाहिना हाथ रखकर वधू का हृदय-स्पर्श करे । यथा—

ॐ मम इत्यस्य मन्त्रस्य परमेष्ठी ऋषिस्त्रिष्टुप्छन्दः, प्रजापतिर्देवता हृदयालम्भने विनियोगः । ॐ मम व्रते ते हृदयं दधामि मम चित्तमनुचित्तं ते अस्तु । मम वाचमेकमनाजुषस्व, प्रजापतिस्त्वा नियुनक्तु मह्यम् । इति मन्त्रेण ।

इस मंत्र को पढ़कर वधू के हृदय का स्पर्श करे ।

अथ हृदयालम्भनानन्तरं वरो वधूमभिमन्त्रयते ।

तदनन्तर वधू को वाम भाग में बैठावे, और सुमंगली करे ।

ॐ सुमङ्गलीरित्यस्य मन्त्रस्य प्रजापतिऋषिरनुष्टुप्छन्दो विवाहाधिष्ठात्र्यो

देवता अभिमन्त्रणे विनियोगः। ॐ सुमङ्गलीरियं वधूरिमाᳬं समेत पश्यत सौभाग्य-मस्यै दत्त्वा यथास्तां विपरेतन । इति मन्त्रेण* ॥

ततो वरः कन्यामुत्थाप्य लोहितवृषचर्मण्युपवेशयेदन्यो वा कश्चित्प्रागुदग्वाऽनु-गुप्तागारे प्रतिलोमास्तीर्णे ॥

तदनन्तर सौभाग्यवती सिंदूर बहोरे, फिर कन्या को दाहिनी तरफ बैठावे। और वह लालरंग को† वृष-चर्म पर पाद धरे।

ॐ इह गाव इति प्रजापतिर्ऋषिर्लिङ्गोक्ता देवता त्रिष्टुप्छन्दः चर्मण्युपवेशने विनियोगः।

---

*अत्र शिष्टाचाराद्वधूं वरस्य वामभागे उपवेशयन्ति । तस्याः सीमन्ते वरेण सिन्दूरं दापयन्ति ॥ अथाग्नेः प्रागुदग्वा पूर्वकल्पितेऽनुगुप्त आगारे उत्तरलोम्नि प्राग्ग्रीवे आनडुहे चर्मणि तां वधू दृढपुरुष उत्थाप्योपवेशयति ॥

† लालरंग के वृषभ-चर्म के स्थान में प्रायः लाल 'तूल' बिछा दी जाती है।

ॐ इह गावो निषीदन्तु, इहाश्वा इह पूरुषाः, इहो सहस्रदक्षिणो यज्ञ इह पूषा निषीदतु । इति मन्त्रेण ॥

चर्मकार को नेग देवे ।

तत्पश्चात् स्विष्टकृत होम करे ।

यद्धा जामाता दृढपुरुषस्तस्मिन्पक्षे वर उपवेशयति वधूम् ॥ तत आगत्य पूर्ववद्यथा तामुपवेश्य, ब्रह्मणान्वारब्धो वरः ॥

ॐ अग्नये स्विष्टकृते स्वाहा, इदमग्नये स्विष्टकृते, न मम ॥ इति स्विष्टकृद्धोमं विधाय, स्रुवावशिष्टाज्यस्य प्रोक्षणीपात्रे प्रक्षेपः । अयं च होमो ब्रह्मणान्वारब्धकर्तृकः । तत आचम्य, संस्रवप्राशनम् । अथाऽऽचम्य ।

हवन के बाद स्रुवे में बचे हुए घृत को, प्रोक्षणीपात्र में गिरावे । यह आहुति भी ब्रह्मा से

मिलकर ही दी जाती है, फिर आचमन करके संस्रव का प्राशन अर्थात् प्रोक्षणीपात्र के जल का प्राशन करे, और पवित्री करके मार्जन करे, तत्पश्चात् पूर्णपात्र† का दान करे।

ॐ अद्य कृतैतद्विवाहहोमकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं दक्षिणां संप्रददे ॥

इति ब्रह्मणे दक्षिणां दद्यात्। स्वस्तीति प्रतिवचनम् ॥

तदनंतर प्रणीतापात्र को औंधाय देवे।

स्वकीयाचार्याय वरं ददाति।

और आचार्य को गो-दान देवे।

ॐ अद्येहेत्यादि० अमुकगोत्रः, अमुकप्रवरः, अमुकशर्मा, कृतैतद्विवाहकर्मणः सिद्ध्यर्थम् इमां गां, रुद्रदैवतां, सदक्षिणाम्, आचार्याय तुभ्यमहं संप्रददे।

---

† पूर्णपात्रलक्षणम्—अष्टमुष्टिर्भवेत्कुंचः कुञ्चाष्टौ चापि पुष्कलः। पुष्कलानि च चत्वारि पूर्णपात्रं तदुच्यते ॥

ॐ अद्येहेत्यादि० अमुकगोत्रः, अमुकप्रवरः, अमुकशर्मा, कृतैतद्विवाहकर्मणः सांगत्वप्राप्तये मनःस्वेच्छां दक्षिणां दातुमहमुत्सृजे ॥

तदनंतर भूयसी दान करे।

ॐ अद्येहेत्यादि० नानानामगोत्रेभ्यो ब्राह्मणेभ्यो यथाशक्ति भूयसीं दक्षिणां दातुमहमुत्सृजे।

ततो ब्रह्मग्रन्थिविमोकः। ॐ सुमित्रियान आप ओषधयः सन्तु। इति पवित्रं गृहीत्वा, प्रणीताजलेन शिरः संमृज्य। ॐ दुर्म्मित्रयास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः। इत्यैशान्यां प्रणीतां न्युब्जीकुर्यात् ॥ तत आस्तरणक्रमेण बर्हिरुत्थाप्य, आज्येनाभिघार्य, हस्तेनैव बर्हिहोमः ॥ तत्र मंत्रः ॥

ॐ देवा गातु विदो गातु वित्वा गातुमित मनसस्पत इमं देवा यज्ञꣳ स्वाहा वाते धाः स्वाहा ॥

वि०
१६२

तत उत्थाय वधूदक्षिणहस्तेन स्रुवस्पृष्टघृतपुष्पफलैः पूर्णाहुतिः ।

तत्र मंत्रः ।

ॐ मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निम् ॥ कविꣳ सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः स्वाहा ।

ततः स्रुवेण भस्मानीय दक्षिणानामिकाग्रगृहीतभस्मना ।

ॐ त्र्यायुषं जमदग्नेरिति ललाटे । ॐ कश्यपस्य त्र्यायुषमिति ग्रीवायाम् । ॐ यद्देवेषु त्र्यायुषमिति दक्षिणांसे । ॐ तन्नो अस्तु त्र्यायुषमिति हृदि । एवं वध्वा अपि कुर्यात् । 'तन्नो' इत्यस्य स्थाने 'तत्ते' इति विशेषः ।

तत्पश्चात् आशीर्वाद दे ।

ॐ अत्रेर्यथाऽनुसूया स्याद्वशिष्ठस्याप्यरुन्धती ।
कौशिकस्य यथा पत्नी तथा त्वमपि भर्तरि ॥

वि०
१६२

ग्राम्यवचनं च कुर्युरित्यनेन शिष्टाचारप्राप्तं तिलककरणाक्षत-चन्दन-मंत्र-विप्रार्चन-प्रतिष्ठामन्त्रपाठादिकमभिषेकमपि यथाकुलं यथादेशसमाचारम्। तत्र तत्र क्रियमाणमनुमन्येत ।

इस प्रकार आशीर्वाद दे, फिर यथाविधि परजों को निछावरि देवे ।

तत आचारात्, शणशङ्खशमीसुवर्णप्रेरितसिन्दूरकरणं वरकर्तृकम् । ततोऽन्यैरपि प्रतिष्ठितस्त्रीपुरुषैः सिन्दूरकरणम् ॥ ग्राम्यवचनम् ॥ ग्राम्याः स्त्रियः ।

अथ वेदितो मण्डपमागत्य दूर्वाक्षतादिग्रहणम् । विवाहादारभ्य त्रिरात्रमक्षार-लवणाशिनौ, अधः शायिनौ, निवृत्तमैथुनौ भवतः, प्राङ्मुखौ वधूवरौ स्थितौ भवतः ।

वर वधू को अर्घ देकर कुहवर (भीतर जनानखाने) में ले जावें, और स्त्री-जन हास्य-रस करें। वर, सासु आदि का वस्त्र पकड़े, सासु वर को नेग देवे, और चार बाती बारकर, वर से मिलवावे, और नेग देय। फिर लहकौर (अपने-अपने देशाचार के अनुसार) खिलावे। उसके बाद आचार्य मंडप में वर-वधू को ग्रंथि-बंधन समेत बुलाकर बैठावे और अपने-अपने देशाचार के अनुसार द्विरागमन की विधि से क्रिया करे। तदनन्तर जनवासे में वर को भेज देवे। और वर, त्रिरात्र अक्षार लवण का भोजन करे, पृथ्वी में शयन करे, और ब्रह्मचर्य से रहे।

इति विवाह-कर्म-पद्धतिः समाप्ता।

अथ द्विरागमन-विधिः ।

वर का सूर्य शुद्ध हो, और कन्या का बृहस्पति शुद्ध हो, और विषम वर्ष अर्थात् मार्ग, फाल्गुन और वैशाख इन मासों में चन्द्र-तारानुकूल में ग्रंथि-बंधन करे । अर्थात् पाटा फेरे, परंतु किसी आचार्य के मत से उसी रात्रि में ग्रंथि-बंधन कर देते हैं ।

उसका विधान—प्रथम वधू के सीमन्त को सुगन्धादि द्रव्य से बाँध, महाउर लगाय, वस्त्र और चूड़ी पहिनाय, हाथ में द्रव्य-सहित अंजुली भर चौक में लावे । तब आचार्य स्वस्तिवाचन का पाठ करे । तदनंतर वर-वधू का ग्रंथि-बंधन कराय, आचमन करावे, और संकल्प करावे । यथा—

ॐ अद्येहेत्यादि० अमुकगोत्रः, अमुकप्रवरः, अमुकशर्मा, सपत्नीकः, द्विरागमन-कर्मणः सिद्ध्यर्थं, तत्रादौ गणेशवरुणगौरीणां पूजनमहं करिष्ये ।

तदनंतर आचार्य का वरण करे ।

ॐ नमोऽस्त्वनंतायेति पादप्रक्षालनम् । युञ्जन्ति इति मन्त्रेण तिलकम् । ॐ अद्येहेत्यादि० अमुकगोत्रः, अमुकप्रवरः, अमुकशर्माणम् एभिः रोचनाक्षत-द्रव्यैराचार्यत्वेन त्वामहं वृणे । व्रतोऽस्मीति प्रतिवचनम् ।

तदनंतर गणेशादिकों का पूजन करे। यथा—

ॐगणानान्त्वेति मन्त्रेण गणेशपूजनम्। इमं मे वरुणेति मन्त्रेण वरुणपूजनम्। श्रीश्च ते लक्ष्मीश्चेति मन्त्रेण गौरीपूजनम्। ॐ अद्येहेत्यादि० कृतयाऽनया पूजनया गणेशवरुणगौर्यः सुप्रीता वरदा भवन्तु।

इसके अनंतर वर का ज्येष्ठ भ्राता अथवा श्वसुर—बतासा, नारियल, सुपारी और द्रव्य से वधू की गोद (कोंछे) में डाले, और चने की खिचड़ी, (अपने-अपने देशाचार के अनुसार) वर वधू की अँजुली भरे। यथा मन्त्रः—

ॐवागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये। जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥

तत्पश्चात् पाटा बदले, और अभिषेक तिलक दे। और आचार्य को दक्षिणा तथा नेगियों को नेवछावरि देवे।

इति द्विरागमनविधानम्।

———

अथ भात ।

भात के दिन कन्या का पिता अनेक प्रकार के भोज्य पदार्थों को बनवाकर दिन में व रात्रि के समय समधी आदि को बुलाकर द्रव्य से संतुष्ट करे और पादप्रक्षालन करे, तदनंतर पाटों पर बिठाकर भोजन करावे, तत्पश्चात् आचार्य विनती पढ़े, पश्चात् सब जनवासे में आवें ।

भातविधि समाप्त ।

निमन्त्रण-विधान ।

प्रथम नापित (नाऊ) सुगंधित वस्तु लेकर, वर और बन्धु-वर्गों के उबटन लगाकर स्नान करावे और कन्या के पिता के दिए हुए अधोवस्त्र को देकर अपना नेग माँगे । फिर कन्या-पिता के बन्धु-वर्ग मिलकर, जनवासे में निमंत्रण देने जायँ, और वर का पादप्रक्षालन कर, तिलक दें । तदनंतर गणेशादिकों का पूजन कर, कन्या का भ्राता सुपारी और द्रव्य वर के हाथ में देकर

हाथ जोड़कर स्तुति करे और आचार्य विनती पढ़े। तत्पश्चात् नाई, बारी आदिकों को नेवछावरि देवे। और वर को कलेऊ-भोजन के लिये ले जावे। और कन्या का पिता धन देकर प्रसन्न करे। तत्पश्चात् स्त्री-जन मंगल-गान करें, इसी प्रकार से तृतीय दिन सड़हार जानना।

—:०:—

अथ चतुर्थीकर्मप्रयोगः।

सामग्री—

रोचना, अक्षत, मौरी, पुष्प-माला, सुपारी, पैसा, पान, कलश, सेरवा, जोर, जोरिया, दूध, दही, घी, चावल, शक्कर, आटा, कौड़ी १० और खीर आदि एकत्र करे।

चतुर्थी-कर्म का विधान।

तत्र विवाहाच्चतुर्थ्यामपररात्रे चतुर्थी-कर्म। तच्च गृहाभ्यन्तर एव कार्यम्। तत उद्धर्त्तनादि कृत्वा, युगकाष्ठपीठोपरि उपविश्य, स्नात्वा, शुद्धवस्त्रं परिधाय, गृहं

प्रविश्य, वधूवरौ प्राङ्मुखौ भवतः। आदौ गणपत्यादिपूजनम्। तत्र कुश-कण्डिका कर्तव्या।

प्रशस्त भूमि में गोबर से लिपावे और अष्टदल कमल बनाकर कलश का स्थापन करे। तदनंतर आचार्य "**पंचभूसंस्कार**" कर अग्नि का स्थापन करे, और 'कुशकण्डिका'† अवश्य करे। और वर सपत्नीक उबटन लगाय, स्नानकर वधू—आभूषण, महाउर सीमंत, चुरिया, जोड़ा धारणकर वर-वधू चौक पर आवें, वधू—वर के दक्षिण और चौक पर बैठे, और ग्रंथि-बंधन आचार्य करे, शूद्र-वर्ण (नाउनि) से न करावे।

तदनंतर आचमन कराय, पवित्री धारणकर, संकल्प करावे। यथा—

ॐ अद्येहेत्यादि० अमुकगोत्रः, अमुकप्रवरः, अमुकशर्मा, सपत्नीकः, विवहांग-चतुर्थीकर्मकारयितुं गणेशवरुणगौरीणां पूजनमहं करिष्ये।

† पूर्व लिख चुके हैं।

तदनंतर आचार्य का वरण करना चाहिये । यथा–

ॐ अद्येहेत्यादि० अमुकगोत्रः, विवाहांगचतुर्थदिनकृत्ये त्वं मे आचार्यो भव। भवामीति प्रतिवचनम् ।

तदनंतर सपत्नीक वर, गणेशादिकों का आवाहन करके पूजन करे, और स्थालीपाक बनाय, आघारादि आज्य-भाग का हवन कर, घी की आहुति छोड़े ।

तत्राघारादारभ्य, आहुतिचतुष्टये तत्तदाहुत्यनन्तरं स्रुवावस्थिताज्यं प्रोक्षण्यां क्षिपेत् ।

ॐ प्रजापतये स्वाहा, इदं प्रजापतये । इति मनसा । ॐ इन्द्राय स्वाहा, इदमिन्द्राय, इत्याघारौ । ॐ अग्नये स्वाहा, इदमग्नये । ॐ सोमाय स्वाहा, इदं सोमाय । इत्याज्यभागौ ।

आज्याहुतिपञ्चतये स्थालीपाकाहुतौ च प्रत्याहुत्यनन्तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः। ततो ब्रह्मणान्वारब्धं विना, तत्र पञ्चानां परमेष्ठी ऋषिस्त्रिष्टुप्छन्दो लिङ्गोक्ता देवता घृतहोमे विनियोगः।

ॐ अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि, ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा॥ इदमग्नये॥ १॥

ॐ वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि, ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा॥ इदं वायवे॥ २॥

ॐ सूर्यप्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि, ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा॥ इदꣳ सूर्याय॥ ३॥

ॐ चन्द्रप्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि, ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै गृहघ्नी तनूस्तामस्यै नाशय स्वाहा॥ इदं चन्द्रमसे॥ ४॥

ॐ गन्धर्वप्रायश्चित्ते त्वं देवानांप्रायश्चित्तिरसि, ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै यशोघ्नी तनूस्तामस्यै नाशय स्वाहा ॥ इदं गन्धर्वाय ॥ ५ ॥ ततः स्थाली पाकेन जुहुयात् ।

तदनन्तर खीर से हवन करे । यथा——

ॐ प्रजापतये स्वाहा, इदं प्रजापतये इति मनसा ।

इस मंत्र की ११ आहुति देवे ।

इति प्राजापत्यं हुत्वा, अग्ने प्रायश्चित्त इत्यादि प्राजापत्यन्तानां षडाहुतीनां संस्रवमुदपात्रे प्रक्षिपेत् ॥ केषाञ्चिन्मते स्विष्टकृतोऽपि संस्रवं क्षिपेत् । अन्यासामाहुतीनां पात्रान्तरे संस्रवं क्षिपेत् । ततः स्थालीपाकेन स्विष्टकृद्धोमः ।

पुनर्यथा——

ॐ अग्नये स्विष्टकृते स्वाहा, इदमग्नये स्विष्टकृते । तत आज्येन महाव्याहृत्यादि

प्रजापत्यन्ता नवाहुतीर्जुहोति ॥ ॐ भूः स्वाहाः, इदं भूः । ॐ भुवः स्वाहा, इदं भुवः । ॐ स्वः स्वाहा, इदं स्वः । ॐ भूर्भुवः स्वः स्वाहा पुनः तिस्रः । एता महाव्याहृतयः ।

तदनंतर घी से सर्वप्रायश्चित्त का होम करे । यथा मन्त्रः—

ॐ त्वन्नोऽग्ने वरुणस्य विद्वान्देवस्य हेडो अवयासिसीष्ठाः । यजिष्ठोवह्नितमः शोशुचानो विश्वेद्वेषाꣳसि प्रमुमुग्धस्मत् स्वाहा, इदमग्नीवरुणाभ्याम् ।

ॐ सत्वन्नोऽग्नेऽवमो भवोती नेदिष्ठो अस्या उषयो व्युष्टौ अवयक्ष्वनो वरुणꣳ रराणो श्रीहि मृडीकꣳ सुहवो न एधि स्वाहा, इदमग्नीवरुणाभ्याम् ॥

ॐ अयाश्चाग्नेस्य नभिशस्तिपाश्च सत्वमित्व मया असि ॥ अयानो यज्ञं वहास्ययानो धेहि भेषजꣳ स्वाहा, इदमग्नये ॥

ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः॥ तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्क्काः स्वाहा, इदं वरुणाय, सवित्रे, विष्णवे, विश्वेभ्यो देवेभ्यो, मरुद्भ्यः स्वर्केभ्यश्च ॥

ॐ उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमं श्रथाय ॥ अथावयमादित्यव्रते तवानागसो अदितये स्याम स्वाहा, इदं वरुणाय ॥ एताः प्रायश्चित्तसंज्ञकाः ॥

ॐ प्रजापतये स्वाहा, इदं प्रजापतये। इति मनसा । इदं प्राजापत्यम् ॥ ततः संस्रवप्राशनम् । तत आचम्य ।

ॐ अस्यां रात्रौ विवाहाच्चतुर्थीहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थ-मिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं

संप्रददे । इति दक्षिणां तुभ्यमहं संप्रददे । इति दक्षिणां दद्यात् ॥ स्वस्तीति प्रति वचनम् । ततो ब्रह्मग्रन्थिविमोकः । ततः–

ॐ सुमित्रिया न आप ओषधयः सन्तु, इति पवित्राभ्यां शिरः संमृज्य । ॐ दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः । इत्यैशान्यां दिशि प्रणीतां न्युब्जीकुर्यात् ॥ ततस्तरणक्रमेण बर्हिरुत्थाप्य घृताक्तं हस्तेनैव जुहुयात् ॥

ॐ देवा गातु विदो गातुं वित्वा गातुमित मनसस्पत । इमं देवयज्ञꣳ स्वाहा वातेधाः स्वाहा ।

अथ कुंभजलेन अभिषेकः–

तत आम्रपल्लवेनोदपात्रादुदकमादाय, वधूं मूर्द्धन्यभिषिञ्चति वरः ।

ॐ याते इत्यस्य मन्त्रस्य प्रजापतिऋषिस्त्रिष्टुप्छन्दो वधूर्देवता वराभिषेचने विनियोगः ।

ॐ याते पतिघ्नी प्रजाघ्नी पशुघ्नी यशोघ्नी निन्दितातनूजारघ्नी । तत एनां करोमि साजीर्यत्वं मया सहासौ । इत्यनेन मन्त्रेण ।

अथ वरो वधूं स्थालीपाकं हुतशेषं सकृत्प्राशयति ।

ॐ प्राणैरित्यस्य प्रजापतिऋषिर्यजुर्वधूर्देवता प्राशने विनियोगः ।

ॐ प्राणैस्ते प्राणान्संदधाम्यस्थिभिरस्थीनि माᳫंसैर्म्मा᳭ᳫंसानि त्वचात्वचमिति मन्त्रेण ।

सा च भर्ता पठिते मन्त्रे प्राश्नाति ॥ ततो वरो वधूहृदयं स्पृष्ट्वा पठेत् ॥

इस मन्त्र से खीर का प्राशन कर, वधू का हृदय-स्पर्श करे, और मन्त्र पढ़े । यथा–

ॐ यत्ते सुसीमे हृदयं दिवि चन्द्रमसि श्रियम् । वेदाहं तन्मां तद्विद्यात पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतम् ।

तत्पश्चात् द्यूत (जुआँ) खेलावे । एक लोई में १६ कौड़ी, रुपया, पैसा और सोना रखकर आचार्य स्थाली में छोड़े, जो दोनों में पहले जीते, वह वशीभूत होवे इस अभिप्राय से द्यूत-कर्म कहा गया है ।

अथ कंकणमोक्षणादीनि युतग्रंथिविमोकादीन्याचारप्राप्तानि । तत उत्थाय वधूदक्षिणहस्तस्पृष्टस्रुवेण घृतफलपुष्पपूर्णेन पूर्णाहुतिं कुर्यात् ।

ॐ मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निम् । कविꣳ सम्राजमतिथिं जनानामासन्नापात्रं जनयन्तु देवाः स्वाहा, इति मन्त्रेण पूर्णाहुतिः ॥

ततः स्रुवेण भस्मानीय दक्षिणानामिकाग्रगृहीतभस्मना ।
ॐ त्र्यायुषं जमदग्नेरिति ललाटे । ॐ कश्यपस्य त्र्यायुषमिति ग्रीवायाम् । ॐ यद्देवेषु त्र्यायुषमिति दक्षिणबाहुमूले । ॐ तन्नोऽस्तु त्र्यायुषमिति हृदये । एवं वध्वा अपि त्र्यायुषं कुर्यात् । 'तन्नो' इत्यत्र 'तत्ते' इति विशेषः । तत आचार्याय दक्षिणां दद्यात् ॥ होत्रे च दक्षिणां दद्यात् । भूयसीमपि ।

तदनंतर पूर्णाहुति करे, अभिषेक, तिलक, दक्षिणा और दान दे । और नेवछावरि करे ।

चतुर्थी-कर्म का विधान समाप्त ।

वर-वधू यात्रा ।

जनवास से वर-समेत बरातियों को कन्या का पिता प्रसन्नता-पूर्वक मंडप के नीचे बुला कर यथावत् बैठावे । वर-वधू को मंडप में बैठाकर, गणेशादिकों का पूजनकर, कन्या-वर के पाद-

प्रक्षालन कर तिलक देवे। पश्चात् बरातियों को बरतौनी देवे, पीछे १०५) रुपया तक रखकर खोरवा और यथाशक्ति दहेज देवे। फिर परिया गूँथ खुलाय, वर-वधू को बिदा करे। वर-वधू को शुभ मुहूर्त में गृह-प्रवेश करना चाहिए, और जो वर के यहाँ परछन आदि लोकाचार कर्म हैं, उन्हें भी करना चाहिए।

इत्युन्नामप्रान्तान्तर्गत-बरौड़ा-ग्राम-वास्तव्येन सामवेदान्तर्गत-कौथुमीशाखाध्यायिपण्डितश्रीशिवगोविन्ददीक्षितेन संगृहीता परिष्कृता च विवाह-पद्धतिः समाप्ता।

प्रकाशक—

तेजकुमार-बुकडिपो, प्रा० लि०

पोस्ट-बाक्स ८५, लखनऊ

श्रीमती कमला भार्गव द्वारा

तेजकुमार-प्रेस, लखनऊ में मुद्रित और प्रकाशित

[सन् १९९३ ई०

चतुर्थ बार २०००]

इति विवाह-पद्धतिः भाषा-टीका सहितम्